CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Sansthan, Naria, Varanasi

CC-0 In Public Domain. Digitized by Sarayu Trust Gangotri

॥६०॥ ॐ नमः सिद्धेभ्यः॥ श्रीमंतं मुक्तिभर्त्तारं वृषभं वृषनायकं। धर्मतीर्थकरं ज्येष्ठं वंदेनंतगुणार्णवं॥१॥ आ
चारांगं बलात्येयो यस्याचारनिरूपकं। आदौ चक्रे यथे काले तस्मै नौघे माम्यायप्रतये सतां॥२॥ नमो जितादिकर्त्तारः
यस्याचारपरायणान्। आचारशुद्धये स्तौमि धर्मतीर्थप्रवर्त्तकौ॥३॥ [illegible] विश्वप्रकाशितं लोके [illegible] नाचारांग [illegible]
हीयमाने मे पिस्तोस्तुति यावदं तिमं दिनं॥४॥ कालेनस्यपंच मंसा [illegible] तं [illegible] चारप [illegible] श्री वर्द्धमा [illegible]
मिथ्याज्ञानतमोपहं॥५॥ शेषाणां येंतीर्थकर्त्तारः आचारांगस्य वर्त्तिनः [illegible] वंद्यास्त्रिजगत्स्वामिभिः स्तु
ताः॥६॥ अजितायां जिनाधीशा विश्वसत्त्वहितोद्यताः। संस्तुतास्ते मया [illegible] वंदिताः संस्तुतां मया॥७॥ विदेहेषु
वसंत्यः प्रवर्त्तयंति मुक्तये। अद्यापि भव्यजीवानां मा चारांगं सुदुस्तरं॥८॥ तस्मै तीर्थकृतः श्रीसीमंधरस्वामिनेनं
मः। अनंतगुणायजिनेंद्राय स्वनंतगुणसिद्धये॥९॥ येत्रार्द्धे द्विकसद्द्वीपद्वये [illegible] जिनाः [illegible] आचारवर्त्तिनः सु
सं दिव्येन ध्वनिना स्तुवे॥१०॥ आचारलक्षणोपेता अतीता काल त्रयोद्भवाः [illegible] सुरेंद्राद्यैः स्तोमि सर्वे स्वयं
सिद्धये॥११॥ आचारांगोक्तमार्गेण आराध्यं रत्नत्रयं द्विधा। तपसा हत्वा कर्माणि ये गुर्निर्वाणमद्भुतं॥१२॥ आचा
रफलं त्वमी ज्ञानात्मानं सिद्धा लोकाग्रवासिनः। दिव्याष्टगुणशर्मान्धीन वंदेनंतान् त्रिकाल संपदे॥१३॥ आचार निष्ठ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीपरमात्मनेनमः श्रीसर्वज्ञवाण्यैनमः सिद्धोमास्वामिपूज्यं जिनवरवृषभं वीरमुन्नीरमान्यं श्रीमत्पूज्यपादं
गुणनिधियनुसत्प्रभाचंद्रमिंदं श्रीविद्यानंदबुधाधीशं गतमलममकलंकार्यमानम्य रम्यं वक्ष्येतत्त्वार्थवृत्तिं जिनवि
वंतयाहं श्रुतोदन्वदाख्यः १ अथश्रीमदुमास्वामिभट्टारकः कलिकालगणधरदेवोमहामुनिमंडलीपरिसेवितपाद
पद्मः कस्मिंश्चिदाश्रमपदेसुस्थितः मनोवाक्कायसरलतयावाचंयमोपि निजमूर्त्यामाश्रितमोक्षमार्गं कथयन्
निवसर्वप्राणिहितोपदेशैककार्यः समार्यजनसमाश्रितः निर्ग्रंथाचार्यवर्यः अतिनिकटभव्यपरमविवे
णे नामसन्नभव्येन द्वैयायकनाम्नाभव्यवरपुंडरीकेण संपृष्टः भगवान्किमात्मने हितमिति भगवानपितत्प्रश्न
वशात्सम्यग्दर्शनज्ञानचारित्रलक्षणोपलक्षितसन्मार्गसंप्राप्योमोक्षोहितइतिप्रतिपादयितुकामः इष्टदेवताविशेषं
शेषंनमस्करोतीति मोक्षमार्गस्यनेतारं भेत्तारंकर्मभूभृतां ज्ञातारंविश्वतत्त्वानां वंदेतद्गुणलब्धये २ वंदे
नमस्करोमि कः कर्ता अहमुमास्वामिनामाचार्यः [illegible] ककमर्हंवंदे तद्गुणलब्धये तस्यभगव
तः सर्वज्ञवीतरागस्य गुणास्तद्गुणास्तेषांलब्धिः प्राप्तिः तद्गुणलब्धिः तस्यै तद्गुणलब्धये तस्माके गुणइति भगवद्गुणान
यगभितं विशेषणत्रयमाह कथंभूतं सर्वज्ञवीतरागं मोक्षमार्गस्यनेतारं मोक्षः सर्वकर्मविप्रयोगलक्षणं तस्यमार्गः सम्यग्द
र्शनज्ञानचारित्रलक्षणो वक्ष्यमाणोमोक्षमार्गस्तस्यनेता प्रापकं नायकं पुनरपि कथंभूतं भेत्तारं चूर्णीकर्त्तारं मूलादुन्मू
लकमित्यर्थः केषांकर्मभूभृतां कर्माणि ज्ञानावरणादीनि तान्येवभूभृतः पर्वताः कर्मभूभृतस्तेषां कर्मभूभृतां कर्मगिरीणां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0 In Public Domain. Digitized by Sarayu Trust/eGangotri

च क्कोवणं हेट्ठोतंनं वि खालंकरणं [illegible] जुलणं [illegible] नेसा हंस [illegible] णं [illegible] हरणं यावं [illegible] वानरं त [illegible]

सा हराणं सा साक णे त्थासा धुनं निस [illegible] हरो [illegible] [illegible] तिभस्त्त , तासंथावनं १ घत्य [illegible] लोति [illegible]

[illegible] सवीनं करत तिं स्सं तिसरोनं कोहे लिते [illegible] तिं [illegible] जे रानि [illegible] ठवक्क [illegible] रा [illegible] [illegible]

दव जेसा जिराजीवा [illegible] नावलि रासमवसरा [illegible] [illegible] [illegible] दसा [illegible] थं [illegible] हाले हि रातिसहस्सा [illegible]

[illegible] लेव खाडुग गा असु संपत्ति १ नहिस्स वारेसा [illegible] ति [illegible] यवा [illegible] चेवकु से [illegible] ता लस हस्सा विरथ [illegible]

[illegible] पोरयवर [illegible] हरो वलवकोल [illegible] यक दि [illegible] स्स [illegible] दा एर ति कम्मसा [illegible] तो [illegible] वेतयक्काद [illegible] संत [illegible] [illegible]

संगसंजंद विस्सत्तिय [illegible] पुण १ [illegible] यादोति स्स [illegible] एर तिरं कम्ममा [illegible] तो ग [illegible] वेतयक्काद सत्त [illegible] हति [illegible]

अनणसरिसे येवि हंगेम [illegible] हे [illegible] नछमणुयाणं यदम [illegible] दिस्स उववत्ति अकबारदो [illegible] वारोत्ति ३

[illegible]

THE CENTRAL JAINA ORIENTAL LIBRARY, ARRAH

ARRAH

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२ तं श्रद्धानमात्रमेव मोक्षोपायं जानंति केचित् ज्ञाननिरपेक्षं चारित्रमेव मोक्षोपायं जल्पंति तदपि मिथ्या तेर्ज्ञानादि
भिर्मोक्षप्राप्तेरुपायो न भवति यथा कश्चिद्व्याधिपराभूतो व्याधिविनाशकभेषजज्ञानेनैव रोगमोक्षो न भवति भेषजोप
योगं विना तथा चारित्रहीनो ज्ञानमात्रान्मोक्षं न लभते यथा कश्चिद्दोषधमाचरन्नपि औषधस्वरूपमजानन्तु छ्राघो
न भवति तथा आचारवानप्यात्मज्ञानरहितो आत्मानादिज्योतिःस्वरूपममन्यमानो मोक्षं लभते कस्मात् आत्मनो
नादिज्योतिस्त्वात् आत्मा आत्मानमनादिज्योतिस्त्वमन्यमानो मोक्षं लभते यथा कश्चिद्दोषधरुचिरहितस्तत्स्वरूपं जा
नन्नप्यौषधं नाचरति सोऽपि दुःखाद्विमुक्तो न भवति तथा आत्मश्रद्धानरहितो ज्ञानचारित्राभ्यां मोक्षं न लभते तदुक्तं ज्ञानं पंगौ क्रिया
चांधे निःश्रद्धे नार्थकृद्द्वयं ततो ज्ञानक्रियाश्रद्धा त्रयं तत्पदकारणं १ अथ येन समस्तेन मोक्षो भवति तत् किमिति प्रश्ने
मिदमाचार्याः प्राहुः सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः सम्यक्शब्दः प्रत्येकं प्रयुज्यते तेन सम्यग्दर्शनं
च सम्यग्ज्ञानं च सम्यक्चारित्रं च सम्यग्दर्शनज्ञानचारित्राणि समीचीनानि सम्यग्दर्शनज्ञानचारित्राणीत्यर्थः तत्र
जीवादिपदार्थानां यथावस्थितप्रतिपत्तिविषयं श्रद्धानं सम्यग्दर्शनं येन येन प्रकारेण जीवादयः पदार्थाः व्यवस्थिता वर्त्तंते तेन
तेन प्रकारेण मोहसंशयविपर्ययरहितं परिज्ञानं सम्यग्ज्ञानं मोह इति अनध्यवसायः संशयः संदेहः विपर्ययो विपरीतत्वं
तैः रहितं सम्यग्ज्ञानमित्यर्थः संसारहेतुभूतक्रियानिवृत्तुद्यतस्य तत्त्वज्ञानवतः पुरुषस्य कर्मादानकारणक्रियोपरमं ज्ञान २
पूर्वकाचरणरहितं सम्यक्चारित्रं एतानि समुदितानि मोक्षस्य मार्गो भवति अथ सम्यग्दर्शनलक्षणप्रतिपादनार्थं सूत्रमि
दं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भूयो पि किं विशिष्टं ज्ञातारं सम्यक्स्वरूपज्ञायकं केषां विश्वतत्वाणां विश्वानि समस्तानि च तानि तत्वानि तेषां विश्वतत्वा
णां अत्रायं भावः सर्वज्ञवीतरागत्वाद्योऽध्याहारेण लब्धः तस्यानंतगुणस्यासाधारणगुणमुख्यत्वेन मोक्षमार्गनेतृत्वकर्म
भूभृद्भेतृत्वविश्वतत्वज्ञातृत्वलक्षण ... त्रयः तत्रान्नवेद्इत्यर्थः अर्थदेयायकः यद्यात्मने हितो मोक्षः किं तर्हि तस्य स्वरूपं
तस्य च मोक्षस्य प्राप्तेरुपायः कः स भगवानाह मोक्षस्येदं स्वरूपं इदं किं जीवस्य समस्तकर्ममलकलंकरहितत्वं अशरीर
त्वम चिंतनीयनैसर्गिकज्ञानादिगुणसहिता अव्याबाधसौख्यं ईदृशमात्यंतिकमवस्थांतरं मोक्ष उच्यते स तु मोक्षो
न्यास्तीर्थकरः ६ ऽतीव परोक्षः छद्मस्थानां प्रवादिनां ते तु तीर्थकरमात्मानं मन्यंते न तु ते तीर्थकराः परस्परविरुद्धार्थ ... भिधायित्वात् ते
षां वाचः मोक्षस्वरूपं न स्पृशंति कस्मात् युक्त्याभासनिबंधनात् यस्मात्कस्माद्युक्त्याभासनिबंधनास्तद्वाचः यतः के
स्थापन चिच्चैतन्यं पुरुषस्य स्वरूपमिति परिकल्पयंति तच्चैतन्यं ज्ञेयाकारच्छेदं पराङ्मुखं तच्चैतन्यं विद्यमानमप्यविद्यमानं
किंवत् खरविषाणवत् कस्मान्निराकारत्वात् कोऽर्थः स्वरूपव्यवसायलक्षणकारशून्यत्वात् केचिच्च पुरुषस्य बुद्ध्यादि
विशेषगुणोच्छेदो मोक्ष इति परिकल्पयंति तदपि ... परिकल्पनं मिथ्यैव कस्माद्विशेषलक्षणशून्यस्य वस्तुनोऽवस्तुत्वा
त् केचित्तु आत्मनिर्वाणं प्रदीपनिर्वाणकल्पं परिकल्पयंति नैरात्म्यनिर्वाणस्य खरविषाणकल्पना सदृशी परिकल्पनास्य
यमाहत्य समर्थिताः इत्यात्मसमर्थितेत्यर्थः यद्येवं मोक्षस्वरूपं मिथ्या तर्हि परमार्थमोक्षस्वरूपं किं तदग्रे कथयि
ष्यामो वयं मोक्षस्य प्राप्तेरुपायमपि प्रवादिनो विसंवदंते केचिच्चारित्रनिरपेक्षं ज्ञानमेव मोक्षोपायं मन्यंते केचि

ध्या

रहितं=

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२ र्शनं आत्मविसुद्धिमात्रं अथेदं सम्यग्दर्शनं जीवादिपदार्थगोचरं कथमुत्पद्यते इति प्रश्ने सूत्रमिदं ब्रुवंत्याचार्याः तन्निसर्गा
दधिगमाद्वा तत् सम्यग्दर्शनं निसर्गात्स्वभावादुत्पद्यते वा अथवा अधिगमादर्थावबोधात् उत्पद्यते ननु निसर्ग
जं सम्यग्दर्शनं अर्थाधिगममप्राप्योत्पद्यते न च यदि अर्थाधिगमं प्राप्योत्पद्यते तर्हि तदपि निसर्गजमपि अधिगमजमेव भव
ति अर्थांतरं न वर्त्तते किमर्थं सम्यग्दर्शनोत्पत्तेर्द्वैविध्यं अविज्ञाततत्त्वस्य अर्थश्रद्धानं न संगच्छते एव सत्यं निसर्गजे अधि
गमजे च सम्यग्दर्शने अंतरंगं कारणं दर्शनमोहस्योपशमः दर्शनमोहस्य क्षयो वा दर्शनमोहस्य क्षयोपशमो वा अयं द्वा
मेव कारणं वर्त्तते तस्मिन् सदृशे कारणे सति यत्सम्यग्दर्शनं बाह्योपदेशं विना उत्पद्यते तत्सम्यग्दर्शनं निसर्गजमुच्यते
यत्सम्यग्दर्शनं परोपदेशेनोत्पद्यते तदधिगमजमुच्यते नैसर्गिकमपि सम्यग्दर्शनं गुरोरक्लेशकारित्वात् स्वाभावि
कमुच्यते ननु गुरूपदेशं विना तदपि जायते ननु तच्छब्दस्य ग्रहणं किमर्थं अनंतरस्य विधिः प्रतिषेधो वा इति परिभाषणात्
निसर्गादधिगमाद्वा ईदृशेनैव सूत्रेण अनंतरं सम्यग्दर्शनमेव लभ्यते तेन सूत्रेण तच्छब्दस्य वैयर्थ्यं सत्यं यथा सम्यग्द
र्शनमनंतरं वर्त्तते तथा मोक्षमार्गशब्दोपि प्रत्यासन्नो वर्त्तते प्रत्यासत्तेः प्रधानं बलीयः इति परिभाषणान्मोक्षमार्गो निसर्गाद
धिगमाद्वा भवतीत्यर्थः उत्पद्यते प्रत्यासत्तेः तच्छब्देन तु सम्यग्दर्शनमेवाकृष्यते तेन तच्छब्दग्रहणे दोषो नास्ति अथ किं
तत्त्वं यस्य श्रद्धानं सम्यग्दर्शनं भवतीति प्रश्ने सूत्रमिदमुच्यते स्वामिना २ जीवाजीवास्रवबंधसंवरनिर्जरामोक्षास्त २
त्त्वं जीवश्चाजीवश्च आस्रवश्च बंधश्च संवरश्च निर्जरा च मोक्षश्च जीवाजीवास्रवबंधसंवरनिर्जरामोक्षाः एते सप्त नव

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

-मूढत्रयं मदाश्चाष्टौ तथानायतनानि षट् अष्टौ शंकादयश्चेति दृग्दोषाः पंचविंशतिः १

दं निर्दिसंत्तिसूरयः तत्वार्थश्रद्धानंसम्यग्दर्शनं योर्थोयथाव्यवस्थितस्तस्यार्थस्यतथाभावोभवनंतत्वमुच्यते अर्यते
गम्यतेज्ञायतेनिश्चीयतेइत्यर्थः उषिकुषिगर्त्तिभ्यःस्थः तत्वेनअर्थस्तत्वार्थः तत्वमेववाअर्थःतत्वार्थः तत्वार्थस्यपरमार्थ
भूतस्यपदार्थस्यश्रद्धारुचिः तत्वार्थश्रद्धानंसम्यग्दर्शनंभवतीतिवेदितव्यं तत्वार्थस्तुजीवादिर्वक्ष्यते ननुअर्थशब्देन
आदिवाक्यं / प्रत्यपि ध क प्रयोजनाभिधानाभिधेयधनादिकंग्राह्यं अर्थद्वयोःतच्छ्रद्धानस्यमोक्षप्राप्तेरयुक्तत्वात् अर्थशब्दस्यानेकार्थत्वं त
दुक्तं हेतौप्रयोजनेवाक्ये निवृत्तौविषयेतथा प्रकारेवस्तुनिद्रव्ये अर्थशब्दःप्रवर्त्तते १ ननुदर्शनमवलोकनं श्रद्धानं
क्योकरहोय कथंघटते सत्यं धातूनामनेकार्थत्वात् रुच्यर्थे दृशिधातुर्वर्त्तते दृशिरप्रेक्षणे प्रेक्षणार्थस्तुप्रसिद्धोप्यर्थोअत्रमोक्षमा
र्गप्रकरणेत्यज्यते तत्वार्थश्रद्धानमात्मपरिणामःसिद्धिसाधनंघटते सतुपरिणामोभव्यात्मनएवभवति प्रेक्षणलक्षणस्त्वर्थः
चक्षुरादिनिमित्तोवर्त्तते सतुसर्वेषांसंसारिणांसाधारणोस्ति समोक्षमार्गअवयवोनसंगच्छते तत्सम्यग्दर्शनंद्विप्रकारंस
रागंवीतरागंच तत्रसरागंसम्यग्दर्शनंप्रशमसंवेगानुकंपास्तिक्यैर्व्यज्यते तत्ररागादिदोषेभ्यश्चेतोनिवर्त्तनंप्रशमः शारीरमा
नसागंतुवेदनाप्रसारात्संसाराद्भयंसंवेगः सर्वेषुप्राणिषुचित्तस्यदयार्द्रत्वमनुकंपा आप्तश्रुतव्रततत्वेषुअस्तित्वयुक्तंमनः
आस्तिक्यमुच्यते यदुक्तं यद्रागादिषुदोषेषु चित्तवृत्तिनिवर्हणं तंप्राहुःप्रशमंप्राज्ञाः समस्तव्रतभूषणं १ शारीरमानसागंतु
वेदनाप्रभवाद्भवात् स्वप्नेंद्रजालसंकल्पाद्भीतिःसंवेगउच्यते २ सत्वेसर्वत्रचित्तस्य दयार्द्रत्वंदयालवः धर्मस्यपरमंमूलमनुकं
पांप्रचक्षते ३ आप्तेश्रुतेव्रतेतत्वे चित्तमस्तित्वसंयुतं आस्तिक्यमास्तिकैरुक्तं मुक्तियुक्तिधरेनरेइति ४ वीतरागंसम्यग्द
जघाथवैक्रः मुक्तविकेतुक्तः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

४ समागतःइत्युक्तेऽपूर्वमर्थोकिंस्त्रियोनभवति तथाआस्रवादयश्चजीवादयःसंतद्रव्यवचनानि तत्वशब्दस्त
भाववाचकस्तेषांतस्यचसमानाधिकरणताकथंघटते जीवादयःकिलतत्वमितिसत्यं अव्यतिरेकात्तयातत्वभा
पो वाध्यारोपचारतयावासमानाधिकरणताभवत्येव लिंगसंख्याव्यतिक्रमस्तुनदुष्यति अजहल्लिंगत्वात् एवंस
म्यग्दर्शनज्ञानचारित्राणिमोक्षमार्गइत्यत्रापियोजनीयं अथसम्यग्दर्शनादिजीवादिव्यवहारव्यभिचारप्र
तिषेधनिमित्तंसूत्रमिदमुच्यते ४ नामस्थापनाद्रव्यभावतस्तन्न्यासः नामचस्थापनाचद्रव्यंचभावश्चनाम
स्थापनाद्रव्यभावा स्तेभ्योनामस्थापनाद्रव्यभावतः तेषांसम्यग्दर्शनादीनांजीवादीनांचन्यासः प्रमाणनयैर्नि
क्षेपः तन्न्यासः अस्यायमर्थः अतद्गुणेवस्तुनिसंव्यवहारप्रवर्त्तननिमित्तं पुरुषाकारात् इच्छया नियुज्यमानंसं
ज्ञाकर्मनामकर्मकथ्यते अतद्गुणेवस्तुनि इतिकोर्थः नविद्यतेशब्दप्रवृत्तिनिमित्ताःतेजगत्प्रसिद्धाजातिगुण
क्रियाद्रव्यलक्षणगुणाविशेषणाः यस्मिन्वस्तुनितद्वस्तु अतद्गुणं तस्मिन्अतद्गुणे तदुक्तं द्रव्यक्रियाजा
तिगुणप्रभेदैः डवित्थकर्तृद्विजपाटलाद्यैः शब्दप्रवृत्तिंमुनयोवदंति चतुष्टयींशब्दविदःपुराणाः १ काष्ठकर्मणि
पुस्तकर्मणि लेपकर्मणि अक्षनिक्षेपेकोर्थः सारिनिक्षेपे वराटकादिनिक्षेपेचसोयंममगुरुरित्यादिस्थापमाना
यासास्थापनाकथ्यते गुणैर्द्रुतंगतंप्राप्तंद्रव्यं गुणाएवाद्रुतंगतंप्राप्तंद्रव्यं गुणैःद्रोष्यतेद्रव्यं गुणान्वाद्रोष्यतीति ४
द्रव्यं २ द्रव्यमेववर्त्तमानपर्यायसहितंभावउच्यते ३ तथाहिकोर्थः नामस्थापनाद्रव्यभावान्दर्शयतिना

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पदार्थाःस्तत्वंभवति तत्रज्ञानादिभेदेनानेकप्रकारांचेतनासालक्षणंयस्यसजीवउच्यते यस्यतुज्ञानदर्शनादिलक्ष
णंनास्ति सपुद्गलधर्माधर्माकाशकाललक्षणोऽजीवः शुभाशुभकर्मागमनद्वारलक्षणआश्रवउच्यते आत्मनःकर्मण
श्चपरस्परप्रदेशानुप्रवेशात्मकभावोबंधः आश्रवनिरोधरूपःसंवरः एकदेशेनकर्मक्षयोनिर्जरा सर्वकर्मक्षयलक्षणोमो
क्षः सर्वफलंजीवाधीनं तेनजीवस्यग्रहणंप्रथमं जीवस्योपकारकोऽजीवस्तेनजीवानंतरमजीवग्रहणं जीवाजीवो
भयगोचरत्वात्ततस्य मध्याश्रवोपादानं आश्रवपूर्वकोबंधभवतीतिकारणात्आश्रवादनंतरंबंधस्वीकारः
बंधप्रतिबंधकःसंवरस्तेनबंधादनंतरंसंवराभिधानं संवृतस्यनिर्जराभवतीतिकारनात्संवरादनंतरंनिर्जराकथनं।
मोक्षस्तुअंतेप्राप्यते तेनमोक्षस्याभिधानमंतेकृतं आश्रवबंधयोरंतरभावात्पुण्यपापपदार्थद्वयसंग्रहणेनकृतं एवंचेदाश्रवो
पिजीवाजीवयोरंतर्भवति तद्ग्रहणमप्यनर्थकं तन्न इहमोक्षशास्त्रेप्रधानभूतोमोक्षः सतुअवश्यमेववक्तव्यः मोक्षस्तुसं
सारपूर्वकोभवति संसारस्यमुख्यहेतुराश्रवोबंधश्च मोक्षस्यमुख्यंकारणंसंवरोनिर्जराच तेनकारणेनप्रधानहेतुमंतो सं
सारमोक्षौसंसारमोक्षलक्षणफलप्रदर्शनार्थंआश्रवादयः पृथग्व्यपदिश्यंते तत्रआश्रवबंधयोःफलंसंवरः संवरनि
र्जरयोःफलंमोक्षः हेतुमतोःफलत्वेननिदर्शनं दृष्टांताश्चात्वारः तेषांचतुर्णामाश्रवादीनांपृथक्व्यपदेशोविहितः
विशेषणप्रदर्शनार्थं यदिसंसारमोक्षयोमध्येएतेचत्वारोत्तर्भवति तर्हिपृथक्किमितिव्यपदिश्यंते साधूक्तंभवता
सामान्येऽतर्भूतस्यापिविशेषस्यभिन्नोपादानंकार्यार्थेहिदृश्यते यथाक्षत्रियाःसमागताः तन्मध्येशूरवर्मापि।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

५ नोआगमभावजीवकथ्यते एवमजीवास्रवबंधसंवरनिर्जरामोक्षाणांषण्णांसम्यग्दर्शनज्ञानचारित्राणांत्रयाणांचनामा
सर्वार्थसी अ दिनिक्षेपविधानंसंयोजनीयं तत्किमर्थं अप्रकृतनिराकरणार्थं प्रकृतस्यनामस्थापनाजीवादिनिरूपणार्थंच
ननुनामस्थापनाद्रव्यभावतोन्यासइतिसूत्रंक्रियतां तच्छब्दग्रहणंकिमर्थं साधूक्तंभवता तच्छब्दग्रहणंसर्वसं
ग्रहणार्थं तच्छब्दंविनाप्रधानभूतानांसम्यग्दर्शनज्ञानचारित्राणामेवन्यासविधिस्यात् तद्विषयाणांजीवादीनामप्रधा ज्ञानादि विषय ४
नानांचन्यासविधिर्नस्यात् तच्छब्दग्रहणेसतिसमर्थत्वात्प्रधानानामप्रधानानांचन्यासविधिंनिषेधंचकर्तुंशक्य
ते अथनामादिप्रस्तीर्णाधिकृततत्त्वानामधिगमःकुतोभवतीतिप्रश्नेसूत्रमिदमुच्यते प्रमाणनयैरधिगमः प्र
माणेचनयाश्चप्रमाणनया तैःप्रमाणनयैः कृत्वाअधिगमः नामादिनिक्षेपविधिकथितजीवादिस्वरूपपरिज्ञानंभव
ति तेप्रमाणेन याश्चवक्ष्यंते तत्रप्रमाणंद्विप्रकारं स्वपरार्थभेदात् तत्रस्वार्थंप्रमाणंश्रुतरहितं श्रुतंतुस्वार्थंपरार्थं
३५ चभवति ज्ञानात्मकंश्रुतंस्वार्थंवचनात्मकंपरार्थंवचनविकल्पंतु पुनःनयाउच्यंते ननुनयशब्दःअल्पस्वरः प्रमाण
शब्दोबहुस्वरः अल्पस्वरंतत्रचपूर्वमितिवचनात् नयशब्दस्यकथंपूर्वनिपातोनभवति साधूक्तंभवता तत्रैवा
प्याद्भूतंपद्मार्चितंद्वयोरितिसूत्रंवर्त्तते तेनप्रमाणस्यअर्चितत्वात्पूर्वनिपातः अभ्यर्चितंतुसर्वेषांबलीयः प्रमा ५
णस्यअर्चितत्वंकस्मात् नयानांनिरूपणप्रभवयोनित्वात् प्रमाणेनार्थंज्ञात्वाऽर्थावधारणंनयउच्यते तेनशक
लादेशःप्रमाणाधीनो विकलादेशोनयाधीनः सनयोद्विःप्रकारोभवति पर्यायार्थिकद्रव्यार्थिकनयेनज्ञातव्यः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मजीवः स्थापनाजीवः द्रव्यजीवो भावजीवश्चेति चतुर्विधो जीवशब्दो न्यस्यते जीवनगुणं विनापि यस्य कस्यचिज्जीवसं
ज्ञा विधीयते स नामजीव उच्यते १ अर्हन्निक्षेपादिषु जीव इति वा मनुष्यजीव इति वा व्यवस्थाप्यमानः स्थापनाजीव उच्यते २
सारिचालनसमये अयं मत्तः अयं गजः अयं पदातिरिति जीवस्थापनेव वर्त्तते द्रव्यजीवो द्विप्रकारः आगम[illegible] द्रव्य
जीवनोआगमद्रव्यजीवभेदात् तत्र जीवप्राभृतज्ञायी मनुष्यजीवप्राभृतज्ञायी वा अनुपयुक्तो निःकार्य आत्मा आगम
द्रव्यजीव उच्यते नोआगमद्रव्यजीवस्त्रिःप्रकारः ज्ञायकशरीरभावितद्व्यतिरिक्तभेदात् तत्र ज्ञायकशरीरं त्रिका
लगोचरं यत ज्ञातुः शरीरं तत् ज्ञायकशरीरमुच्यते सामान्यत्वेन नोआगमद्रव्यभाविजीवो न विद्यते कस्मात् जीवनसामा
न्यस्य सदैव विद्यमानत्वात् विशेषापेक्षया तु नोआगमद्रव्यभावजीवः [illegible]स्तु विद्यत एव कोसौ विशेषः कश्चिज्जी
वो गत्यंतरे स्थितो वर्त्तते स मनुष्यं न भवप्राप्तिं प्रतिसन्मुखो मनुष्यभाविजीव उच्यते अथवा यदा जीवादिप्राभृतं न जाना
ति अग्रे तु ज्ञास्यति तदा भाविनोआगमद्रव्यजीव उच्यते तद्व्यतिरिक्तः कोर्थः कर्मनोकर्मभेदः तत्र कर्म तावत्प्रसिद्धं नो
कर्मस्वरूपं निरूप्यते औदारिकवैक्रियिकाहारकशरीरत्रयस्य षट्पर्याप्तीनां च योग्यपुद्गलानामादानं नोकर्म ३ भा
वजीवो द्विप्रकारः आगमभावजीवनोआगमभावजीवभेदात् तत्र आगमभावजीवप्राभृतविषयोपयोगाविष्टः परिणतः आ
त्मा आगमभावजीवः कथ्यते मनुष्यजीवप्राभृतः विषययोगसंयुक्तो वा आत्मा आगमभावजीवः कथ्यते नोआगमभाव
स्वरूपं निरूप्यते जीवनपर्यायेण समाविष्ट आत्मा नोआगमभावजीवः मनुष्यजीवपर्यायेण वा समाविष्ट आत्मा।

उपयोग कहा कहीये तिसका अर्थ कोधारणचित
वनकैसा उपयोगकरिसंयुक्त ३

ज्ञानावर्णा
दि
पदौ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

ग्रा२

६ णयाःप्रारंभकेन वेदकेन युक्तस्य तत्रोत्पादे विरोधाभावात् एवं तिरश्चामप्यपर्याप्तकानां क्षायोपशमिकत्वं ज्ञातव्यं ति
र्यग्गतौ तिरश्चां पर्याप्तकानामौपशमिकं भवति क्षायिकं क्षायोपशमिकं पर्याप्तापर्याप्तकानामस्ति तिरश्चीनां क्षायि
कं नास्ति कस्मादिति चेदुच्यते कर्मभूमिजो मनुष्य एव दर्शनमोहक्षपणायाः प्रारंभको भवति क्षपणायाः प्रारंभका
लात्पूर्वं तिर्यक्षु बद्धायुष्कोऽपि उत्कृष्टभोगभूमिजतिर्यग्मनुष्येष्वेवोत्पद्यते तेन तिर्यक्स्त्रीषु तदुक्तं दंसणमोहक्खव
णा पट्ठवगो कम्मभूमिजादो हु मणुसो केवलिमूले णिट्ठवगो चावि सव्वत्थ १ उपशमिकं क्षायोपशमिकं च स
म्यग्दर्शनं पर्याप्तकानामेव तिरश्चीनां भवति न तु अपर्याप्तकानां तिरश्चीनां एवं मनुष्यगतौ मनुष्याणां पर्याप्तापर्या
प्तकानां क्षायिकं क्षायोपशमिकं च भवति उपशमिकं पर्याप्तकानामेव न तु अपर्याप्तकानां मानुषीनां तु त्रयमपि
पर्याप्तिकानामेव न त्वपर्याप्तिकानां क्षायिकं तु सम्यक्त्वं यत मानुषीनामुक्तं तद्भाववेदापेक्षयैव द्रव्यस्त्रीणां तु स
म्यग्दर्शनं न भवत्येव देवगतौ देवानां पर्याप्तापर्याप्तकानां सम्यग्दर्शनत्रयमपि भवति अपर्याप्तावस्थायां देवा
नां कथमौपशमिकं भवति उपशमिकयुक्तानां मरणसंभवात् सत्यं मिथ्यात्वपूर्वकौपशमिकयुक्तानामेव मर
णसंभवोऽस्ति वेदकपूर्वकौपशमिकयुक्तानां तु मरणसंभवोऽस्त्येव कथं वेदकपूर्वकौपशमिकेन युक्ताः श्रेण्या
रोहणं कुर्वंति श्रेण्यारोहाद्यारित्रमोहोपशमेन सह मृता न पेक्षा अपर्याप्तावस्थायामपि देवानामौपशमिकं
संभवंति विशेषेण तु भवनवासिनां व्यंतराणां ज्योतिष्काणां च देवानां तद्देवीनां च क्षायिकं वर्तते सौधर्मैशा ६

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नामस्थापनाद्रव्यभावचतुष्टयंसमुदितंसर्वंप्रमाणेनज्ञातव्यं तेनप्रमाणःसकलादेशोनयस्तुविकलादेशइ
तियुक्तं अथप्रमाणनयैरधिगताअपिजीवादयःपदार्थाभूयोपिउपायांतरेणाधिगम्यंतेइत्यर्थंचेतस्यवधार्यसूत्र
मिदंसूरयःप्राहुः निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानतः निर्देशपनेइतिनिर्देशःस्वरूप
कथनं स्वामित्वंचअधिपतित्वंसाधनंउत्पत्तिकारणं अधिकरणंचआधारः अधिष्ठानमितियावत् स्थितिःकाल
लावधारणं विधानंचप्रकारः निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानानि तेभ्यःनिर्देशस्वामित्वसाधनाधि
करणस्थितिविधानतः एभ्यःषड्भ्यः अधिगमसम्यग्दर्शनमुत्पद्यते तत्रसम्यग्दर्शनंकिमितिकेनचित्प्रश्नेकृ
तत्वार्थश्रद्धानं ते तंप्रतिसम्यग्दर्शनमितिनिर्देशः नामस्थापनाद्रव्यंभावोवानिर्देशउच्यते १ कस्यसम्यग्दर्शनंभवतीतिप्रश्नेसम्य
गदर्शनस्वामित्वप्रश्नेकेनचित्प्रश्नेकृतेसतितंप्रत्युच्यते सामान्येनसम्यग्दर्शनस्यस्वामीजीवोभवतीतिस्वामित्व
मुच्यते विशेषेणतुचतुर्दशमार्गणानुवादेनस्वामित्वमुच्यते तत्रगत्यनुवादेननरकगतौसप्तस्वपिपृथ्वीषुनारकाणांप
र्याप्तकानांद्विसम्यक्त्वेभवतः उपशमिकंक्षायोपशमिकंच वेदनानुभवनादित्यर्थः प्रथमपृथिव्यांपर्याप्तकानामप
र्याप्तकानांचक्षायिकंक्षायोपशमिकंचसम्यक्त्वमिति कथंनरकगतौपूर्वंबद्धायुष्कस्यपश्चाद्गृहीतक्षायिकक्षायो
षट्२ पशमिकसम्यक्त्वस्यअधःपृथ्वीषुउत्पादाभावात् प्रथमपृथिव्यामपर्याप्तकानांक्षायिकंक्षायोपशमिकंवर्त्तते न
नुवेदकयुक्तस्यतिर्यग्मनुष्यनरकेषूत्पादाभावात् कथमपर्याप्तकानां तेषांक्षायोपशमिकमिति सत्यं कृपं

परजोपतितअपेक्षातेवेदकहोय१ कोइकनारकैविषेवेदनातैंहोय कोयकंकेजातिस्मरणतैंहोय कोयक
केधर्मश्रवणतैंहोय ५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

७ यत्सम्यक्त्वं तत्तदेव १२ संज्ञानुवादेन संज्ञिनां सम्यग्दर्शनत्रयमपि असंज्ञिनामेकमपि नास्ति येतु न संज्ञि
नः नाप्यसंज्ञिनि न स्तेषां क्षायिकमेव १३ आहारानुवादेन आहारकानां सम्यग्दर्शनत्रयमपि छद्मस्था
नामनाहारकानां त्रितयमपि सम्यग्दर्शनं समुद्घातप्राप्तानां केवलिनां क्षायिकमेव १४ सम्यग्दर्शनस्य सा
धनं द्विप्रकारं अभ्यंतरबाह्यभेदात् तत्र अभ्यंतरं सम्यग्दर्शनस्य साधनं दर्शनमोहस्य उपसमः क्षयोपशमः
क्षयो वा बाह्यं सम्यग्दर्शनस्य साधनं नारकानां प्रथमद्वितीयतृतीयनरकभूमिषु केषांचिज्जातिस्मरणं केषांचिद्ध
र्मश्रवणं केषांचिद्वेदनानुभवनं चतुर्थ्यादिसप्तमीपर्यंतासु नरकभूमिषु नारकानां जातिस्मरणं वेदनानुभवो सम्य
ग्दर्शनस्य साधनं केषांचिज्जातिस्मरणमन्येषां धर्मश्रवणं अपरेषां जिनमहिम दर्शनमितरेषां [illegible] देवर्द्धि
दर्शनं सहस्रारपर्यंतं आनतप्राणतारणाच्युतदेवानां देवर्द्धिदर्शनं सम्यग्दर्शनस्य साधनं नास्ति जातिस्मरणं धर्म
श्रवणं जिनमहिमदर्शनानि वर्त्तंते नवग्रैवेयकदेवानां केषांचिज्जातिस्मरणं परेषां धर्मश्रवणं ग्रैवेयकवासिना
महमिंद्रत्वात् कथं धर्मश्रवणमिति चेदुच्यते तत्र कश्चित्सम्यग्दृष्टिः परिपाटीं करोति शास्त्रगुणनिकां करोति
तामाकर्ण्य अन्यः कोपि तत्र स्थित एव सम्यग्दर्शनं गृह्णाति अथवा प्रमाणनयनिक्षेपास्तेषां न विद्यंते तत्त्ववि
चारं क्लिंगिनामिव विद्यत इति नास्ति दोषः अनुदिशानुत्तरविमानदेवास्तु पूर्वमेव गृहीतसम्यक्त्वाः संतीत्यच्यंते ते
षां जातिस्मरणधर्मश्रवणकल्याणानास्ति अधिकरणं द्विप्रकारं आभ्यंतरबाह्यभेदात् अभ्यंतरं सम्यग्दर्शन। ७

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इनचारोंमेएककोइजुदोकीजेवाकोदहलीननपाउ ८

नकल्पवासिनीनांचदेवीनांक्षायिकंसम्यग्दर्शनंनास्ति सौधर्मेशानकल्पवासिनीनांचदेवीनांपर्याप्तकानामौपशमिकं क्षायो
पशमिकंचवर्त्तते १ इंद्रियानुवादेनपंचेंद्रियसंज्ञिनांसम्यग्दर्शनत्रितयमप्यस्ति एकेंद्रियद्वींद्रियत्रींद्रियचतुरिंद्रियाणा
मेकमपिनास्ति २ कायानुवादेनत्रसकायिकानां त्रितयमपिभवति स्थावराणा मेकमपिनास्ति ३ योगानुवादेनत्रयाणां
योगानां त्रितयमपिभवति अयोगिनांक्षायिकमेव ४ वेदानुवादेनवेदत्रयस्यदृगत्रयमपिभवति अवेदानामौपशमिकं
क्षायिकंच ५ कषायानुवादेनचतुःकषायानांत्रितयमपिविद्यते अकषायाणामौपशमिकंक्षायिकंच ६ ज्ञानानुवा
देनमतिश्रुतावधिमनःपर्यायज्ञानिनांत्रितयमपिदीयते केवलिनांक्षायिकमेव ७ संयमानुवादेनसामायिकछेदोप
स्थापनासंयमिनांत्रितयं परिहारविशुद्धिसंयमिनांवेदकक्षायिकंच परिहारविशुद्धिसंयतानामौपशमिकंकस्मान्नभवति
चेत् मनपर्ययपरिहारशुद्ध्यौपशमिकसम्यक्त्वाहारकाद्धीनांमध्येअन्यतरसंभवेपरंत्रितयंनभवति एकस्मिन्मनः १६
दे०५ पर्ययेतुमिथ्यात्वपूर्वकोपशमिकस्यत्रितयेपोदृष्टं नवेदकपूर्वकस्य उक्तंच मनपज्जवपरिहारा उवसंमसम्मत्त
आहारयादोन्नि एदेसिंएगदरे सेसानंसंभवोणत्थि १ आहारयादोण्णि आहारकाहारकमिश्रेः सूक्ष्मसंपराययथा
ख्यातसंयमिनामौपशमिकंचक्षायिकंचवर्त्तते संयतासंयतानांअसंयतानांत्रितयंवर्त्तते ८ दर्शनानुवादेनचक्षुर
चक्षुरवधिदर्शनिनांसदृष्टित्रयमपिस्यात् केवलिनांक्षायिकमेव ९ लेश्यानुवादेनषड्लेश्यानांसम्यक्त्वत्रयमपि
निर्लेश्यानांक्षायिकमेव १० भव्यानुवादेनभव्यानांत्रयमपि अभव्यानामेकमपिनास्ति ११ सम्यक्त्वानुवादेनयत्र

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

~~लोतचे चतुर्दशसागरा सम नवग्रीवके एकत्रिंशत्सागरा एवं सर्वार्थसिद्धौ त्रयस्त्रिंशत्सागराः ॥ जघन्येन मनुष्याणामुदेशितास्तिर्यक्ष्वपि~~
~~सर्वेजीवानां स्थितिरनादिनंता पर्याये एकसमयः~~

८ मनसाश्रवस्य च जघन्येन एकसमयः उत्कर्षेण घटिकाद्वयं मध्यमास्थितिरंतर्मुहूर्त्तः कायाश्रवस्य च जघन्येन ए
कसमयः उत्कर्षेण अनंतकालः तत्कथं अनंतकालस्थितिरेकस्मिन्नेव काये मृत्वा मृत्वा स एव जीव उत्पद्यते अ
न्यो वा बंधस्थितिर्वेदनीयस्य जघन्या द्वादश मुहूर्त्ता नामगोत्रयोरष्टौ मुहूर्त्ता शेषाणामंतर्मुहूर्त्ता जघन्या स्थि
तिः ज्ञानदर्शनावरणवेदनीयांतरायाणामुत्कृष्टा स्थितिः त्रिंशत्सागरोपमकोटीकोट्यः मोहनीयस्योत्कृष्टा स्थि
तिः सप्ततिसागरोपमकोटीकोट्यः नामगोत्रयोरुत्कृष्टा स्थितिर्विंशतिसागरोपमकोटीकोट्यः आयुष्कर्मणः उत्
कृष्टा स्थितिः त्रयस्त्रिंशत्सागरा एवं संवरस्य जघन्या स्थितिरंतर्मुहूर्त्ता उत्कृष्टा पूर्वकोटी देशोना निर्जरायाः जघ
न्या स्थितिरेकसमयः उत्कृष्टा अंतर्मुहूर्त्ता मोक्षस्य स्थितिः साद्यनंता विधानं सम्यग्दर्शनं कतिभेदमिति केन
चित्पृष्टे सामान्येन सम्यग्दर्शनमेकमेव विशेषेण निसर्गजाधिगमजविकल्पाद् द्विधं वि उपसमवेदकक्षायि
कभेदात् त्रिविधं दशविधं च तदुक्तं आज्ञा १ मार्ग समुद्भव २ मुपदेशात् ३ सूत्र ४ बीज ५ संक्षेपात् ६ विस्तारा ७ र्थाभ्यां ८ भव उत्पत्ति वितर्के ४
गा० ट ९ परमावादिगाढं च १० अस्या आर्याया विवरणार्थं वृत्तत्रयमाह तथाहि आज्ञासम्यक्त्वमुक्तं यदुत विरुचितं वीत हे आधास
रागाज्ञयैव त्यक्तग्रंथप्रपंचं शिवममृतपथं श्रद्दधन्मोहशांते मार्गश्रद्धानमाहुः पुरुषवरपुराणोपदेशोपजाता ८
या संज्ञानागमाब्धिप्रसृतिभिरुपदेशादिरादेशि दृष्टिः १ आकर्ण्याचारसूत्रं मुनिचरणविधेः सूचनं श्रद्दधानः सू
क्तासौ सूत्रदृष्टिः दुरधिगमगतेरर्थसार्थस्य बीजैः केश्चिज्जातोपलब्धेरसमसमवसाद्वीजदृष्टिः पदार्थान् संक्षेपेणै
दुष्कर ... बीज ... भवति ... इति उक्ते

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

स्याधिकरणमात्मैव वांस्यमधिकरणं सम्यग्दर्शनस्य चतुर्दशरज्वायामा एकरज्जुविष्कंभा लोकनाडी वेदितव्या जी
वाकाशपुद्गलकालधर्माधर्माणां निश्चयनयेन स्वप्रदेशा एवाधिकरणं व्यवहारेण आकाशारहिता नामाकाशमधि
करणं जीवस्य शरीरस्येत्यादिरप्यधिकरणं कुटल कुटादिपुद्गलानां भूम्यादिर प्याहारः जीवादिद्रव्यगुणपर्ययाणां
ज्ञानसुखादिरूपादिरधिकरणं घटादीनां जीवादिद्रव्य मेवाधिकरणमित्याद्यधिकरणं वेदितव्यं औपसमिकदर्शनस्य
उत्कृष्टा निकृष्टा च स्थितिरंतर्मुहूर्त्तः क्षायिकस्य सम्यग्दर्शनस्य स्थितिः संसारिजीवस्य जघन्यान्तर्मुहूर्त्तकी
उत्कृष्टा तु त्रयस्त्रिंशत्सागरोपमानि कथंभूतानि त्रयस्त्रिंशत्सागरोपमानि अंतर्मुहूर्ताधिकाष्टवर्षहीनपूर्वकोटीद्वय
सहितानि ततपश्चात् क्षायिकसम्यग्दृष्टेः संसारो निवर्त्तते तथाहि कश्चित्कर्मभूमिजो मनुष्यः पूर्वकोट्यायुरुत्पन्नो
गर्भाष्टमवर्षनंतरमंतर्मुहूर्तेन दर्शनमोहं क्षपयित्वा क्षायिकसदृष्टिर्भूत्वा तपो विधाय सर्वार्थसिद्धावुत्पद्यततश्च्यु
त्वा पूर्वकोट्यायुरुत्पद्य कर्मक्षयं कृत्वा मोक्षं यांति भवत्रयं नातिक्रामति मुक्तजीवस्य साद्यनंता क्षायिकसम्यग्दर्शन
स्य स्थितिर्वेदितव्या वेदकस्य जघन्या स्थितिरंतर्मुहूर्तिकी वेदकस्य उत्कृष्टा स्थितिषट्षष्टिसागरोपमानि सा कथं
सौधर्मे द्वौ सागरौ शुक्रे षोडशसागराः शतारे अष्टादशसागराः अष्टमग्रैवेयके त्रिंशत्सागराः लांतवे चतुर्दशसा
गराः नवग्रैवेयके एकत्रिंशत्सागराः एवं षट्षष्टिः अंतसागरस्त्रोषे मनुष्यायुर्हीनं क्रियते तेन षट्षष्टिसागराः साधि
का न भवंति सर्वजीवानां द्रव्यापेक्षया अनाद्यनंता स्थितिः पर्यायापेक्षया एकसमयादिका स्थितिः वा गाथ्रवस्य म
एवं षट्षष्टिसागराः। अथवा सौधर्मे द्विरुत्पन्नस्य चत्वारः सागराः। सनत्कुमारे सप्तसागराः। ब्रह्मणि दशसागराः। २

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तैस्तथोक्तैः चकारः परस्परसमुच्चयेवर्त्तते किंतु सत्संख्याक्षेत्रस्पर्शनकालांतरभावाल्पबहुत्वैश्च ५

९ लांतरभावाल्पबहुत्वैश्च॥ ॥सच्छब्दो यद्यप्यनेकार्थो वर्त्तते साधर्चितप्रशस्तेषु सत्ये स्थित्वेति सन्मतइतिवचनात् त
थाप्यत्र अस्तित्वे गृह्यते न अन्यत्र संख्याशब्देन भेदगणनावेदितव्या क्षेत्रं निवास उच्यते सतु वर्त्तमानकालविषयः
स २ क्षेत्रमेव त्रिकालगोचरं स्पर्शनमुच्यते मुख्य व्यवहारिकविकल्पात् कालो द्विप्रकारः विरहः कालांतरं कथ्यते उपशा
मिकादिलक्षणो भावः परस्परापेक्षया विशेषपरिज्ञानमल्पबहुत्वं सच संख्या च क्षेत्रं च तत्स्पर्शनं च कालश्चांतरश्च
भावश्चाल्पबहुत्वं च सत्संख्याक्षेत्रस्पर्शनकालांतरभावाल्पबहुत्वानि तैः अष्टभिरनुयोगैश्च अधिगमो भवति ननु नि
र्देशात् सत्सिद्धं विधानात् संख्यापि ज्ञायते अधिकरणात् क्षेत्रस्पर्शनद्वयस्वीकारो भविष्यति स्थितिग्रहणात् कालो
विज्ञाते नामादिसंगृहीतो भावश्च वर्त्तते पुनः सच्छब्दादीनां ग्रहणं किमर्थं साधूक्तं भवता शिष्याभिप्रायवशादेषां ग्रहणं
केचित् शिष्याः संक्षेपरुचयः केचिद्विस्तारप्रियाः अन्ये मध्यमरुचयः संतोषिणः सत्पुरुषाणां तु उद्यमः सर्वजीवोपकारार्थः इति
कारणात् अधिगमस्य अभ्युपायः कृतः अन्यथा प्रमाणनयैरधिगमो भवति अपरग्रहणमनर्थकं भवति तत्र तावज्जीवद्रव्य
मुद्दिश्य सदाद्यधिकारो विधीयते ते तु जीवाश्चतुर्दशगुणस्थानेषु तिष्ठंति कानि तानि इति चेदुच्यंते मिथ्यादृष्टिः १ सा
सादनसम्यग्दृष्टिः २ सम्यग्मिथ्यादृष्टिः ३ असंयतसम्यग्दृष्टिः ४ देशसंयतः ५ प्रमत्तसंयतः ६ अप्रमत्तसंयतः ७ अपू
र्वकरणगुणस्थाने उपसमकः क्षपकः ८ अनिवृत्तिबादरसांपरायगुणस्थाने उपशामकः क्षपकः ९ सूक्ष्मसांपरायगुण ९
स्थाने उपसमकः क्षपकः १० उपशांतकषायवीतरागछद्मस्थः ११ क्षीणकषायवीतरागछद्मस्थः १२ सयोगिकेवली १३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0 In Public Domain. Digitized by Sarayu Trust/eGangotri

वचनान्यंतरे नार्थहेतु: हेतु:सांगागवाह्यप्रवचनं २

वबुधारुचिमुपगतवान्साधुसंक्षेपैर्हृष्टि: २ ये:श्रुत्वाद्वादशांगीकृतरुचिरि :विद्धि विस्तारदृष्टिं संजातार्था
त्कुतश्चित्प्रवचनैभवणायोर्थितायावगाढा: केवल्यालोकितार्थैरुचिरिहप गावादिगाढेति रूढा: २ एवंसंख्ये प्रसिद्ध:२
यविकल्पंसम्यग्दर्शनप्ररूपकसब्दानांसंख्यातत्वात् अध्यायकमध्यातव्य भेद संख्येया अनंताश्च सम्यग्दर्शन
स्यभेदा:भवंतितदपिकस्मात् अध्यायकानांभेदोऽसंख्यातानंतमानावछिन्न: अध्यायकवृत्तित्वात् एवंनिर्देशस्वामि
त्वसाधनाधिकरणस्थितिविधानत: विधिर्यथायोजितस्तथा ज्ञानेचारित्रेच सूत्रानुसारेण योजनीय: आश्रवोद्विविध:
शुभाशुभविकल्पात् तत्रकायिकआश्रव: हिंसानृतास्तेयाब्रह्मादिषुप्रवृत्तिनिवृत्ती वाचिकाश्रव: परुषाक्रोश
पिशुनपरोपघातादिषुवचस्सुप्रवृत्तिनिवृत्ति मानसआश्रवोमिथ्याश्रुत्यभिघातेर्ष्यासूयादिषुमनस:प्रवृत्तिनिवृत्ती
वंधोद्विविध: सुभासुभभेदात् चतुर्धा प्रकृतिस्थितिअनुभागप्रदेशभेदात् आश्रवभेदात्संवरोपितद्भेद: आ
श्रवनिरोधीसंवरइतिवचनात् निर्जराद्विविधा: यथाकालोपक्रमिकअनोपक्रमिकभेदात् अष्टज्ञानावरणादिभे
दात् ज्ञानंसामान्यादेकं द्विधाप्रत्यक्षपरोक्षत: पंचधामत्यादिभेदात् चारित्रंसामान्यादेकं द्विधाबाह्याभ्यंतरनि
वृत्तिभेदात् त्रिधाऊपशमिकक्षायिकमिश्रभेदात् पंचधासामायिकछेदोपस्थापनापरिहारविशुद्धिसूक्ष्मसां
परायथाख्यातभेदादिविधानंवेदितव्यं अजीवादीनामधिगमोयथाप्रमाणनयैर्भवतितथानिर्देशादिभि:प्र
द्धिश्च भवति यथान्यैरपिकैश्चिदुपायैरधिगमोभवतिनचेतिप्रश्नेसूत्रमिदमुच्यते ७ सत्संख्याक्षेत्रस्पर्शनका

Ganesh Varni Digambar Jain Institute, Naria, Varanasi.

नहीकथन२ चौथ्यागुणस्थानेते

१० स्थानद्वयमस्ति॥ सम्यग्मिथ्यादृष्टेर्ज्ञानमज्ञानं च केवलं न संभवति तस्याज्ञानत्रयाधारत्वात् उक्तं च णाणेसेणणणत्तयं मिस्सं
अण्णाणत्तयेणेत्ति तेन ज्ञानानुवादे मिश्रस्थानं भिधानतस्याज्ञानप्ररूपणायामेवाभिधानं ज्ञानं ज्ञातव्यं ज्ञानस्यय
याथास्थितार्थ विषयत्वाभावात् मतिश्रुतावधिज्ञानेषु क्षीणकषायांतानि असंयतसम्यग्दृष्ट्यादीनि वर्त्तंते मनःप
र्ययज्ञाने प्रमत्तसंयतादीनि क्षीणकषायांतानि सप्तगुणस्थानानि संति केवलज्ञाने सयोगोऽयोगश्च गुणस्थान
द्वयं वर्त्तते॥ संयमानुवादेन सामायिकच्छेदोपस्थापनशुद्धिसंयमद्वये प्रमत्तादीनि चत्वारि गुणस्थानानि परिहारविशुद्धिसं
यमे प्रमत्ताप्रमत्तद्वयं सूक्ष्मसांपरायशुद्धिसंयमे सूक्ष्मसांपरायगुणस्थानमेकमेव यथाख्यातविहारशुद्धिसंयमे उपसम
कषायादीनि चत्वारि गुणस्थानानि भवंति देशसंयमे देशसंयमगुणस्थानमेकमेव असंयता आदिगुणस्थानचतुष्टये भवं
ति दर्शनानुवादेन चक्षुरचक्षुर्दर्शनयोः आदितो द्वादशगुणस्थानानि भवंति अवधिदर्शने असंयतसदृष्ट्यादीनि नव
गुणस्थानानि भवंति केवलदर्शने सयोगायोगद्वयं भवति लेश्यानुवादेन कृष्णनीलकपोतलेश्यासु मिथ्यादृष्ट्यादीनि चत्वा
पीत रि गुणस्थानानि तेजः पद्मलेश्ययोरादितः सप्तगुणस्थानानि शुक्ललेश्यायां आदितस्त्रयोदशगुणस्थानानि संति चतुर्दशगुणस्था
नमलेश्यं भव्यानुवादेन भव्येषु चतुर्दशापि गुणस्थानानि भवंति अभव्येषु प्रथममेव गुणस्थानं सत् सम्यक्त्वानुवादेन क्षायिकस
म्यक्त्वे असंयतसदृष्ट्यादीन्येकादशगुणस्थानानि भवंति वेदकसम्यक्त्वे चतुर्थादीनि चत्वारि उपशमिकसम्यक्त्वे चतुर्थादी १०
नि अष्टगुणस्थानानि संति सासादनसम्यग्दृष्टौ सासादनगुण स्थानमेकमेव मिथ्यादृष्टौ मिथ्यादृष्टिगुणस्थानमेकमे

मिश्रगुणस्थानके विषे एक मिश्रहि गुणस्थान है।

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मिथ्यादृष्टि आदि दे पांच गुण स्थान है ५

अयोगकेवली १४ अमीषां जीवसमासानां प्ररूपणार्थं चतुर्दश मार्गणास्थानानि ज्ञातव्यानि तथाहि गतय ४ इंद्रियाणि ५ कायाः ६ योगाः ४ वेदाः ५ कषायाः ६ ज्ञानानि ७ संयमाः ८ दर्शनानि ९ लेश्याः १० भव्याः ११ सम्यक्त्वानि १२ संज्ञा १३ आहार १४ श्चेति गुणस्थानेषु सत्प्ररूपणा द्विप्रकारा सामान्यविशेषभेदात् तत्र सामान्येन अस्ति मिथ्यादृष्टिः अस्ति सासादनसम्यग्दृष्टिः अस्ति सम्यग्मिथ्यादृष्टिः अस्ति असंयतसम्यग्दृष्टिः अस्ति प्रमत्तसंयतः इत्यादि चतुर्दश गुणस्थानेषु वक्तव्यं विशेषेण गत्यनुवादेन नरकगतौ सप्तस्वपि पृथिवीषु मिथ्यादृष्ट्यादि चत्वारि गुणस्थानानि वर्तंते तिर्यग्गतौ देशसंयतांतानि पंच गुणस्थानानि संति मनुष्यगतौ चतुर्दशापि जाग्रति देवगतौ आद्यानि विद्यंते इंद्रियानुवादेन एकद्वित्रिचतुरिंद्रियेषु प्रथमं गुणस्थानं ध्रियते पंचेंद्रियेषु चतुर्दशापि आसते कायानुवादेन पृथिव्यादि पंचकायेषु प्रथमं गुणस्थानं जागर्ति त्रसकायेषु चतुर्दशापि विद्यंते योगानुवादेन त्रिषु योगेषु सयोगकेवल्यंतानि त्रयोदश गुणस्थानानि ध्रियंते तत्पश्चाद् अयोगकेवली वेदानुवादेन त्रयाणां वेदानां अनिवृत्तिबादरांतानि नव विद्यंते वेदरहितेषु अनिवृत्तिबादराद्य अयोगकेवल्यंतानि षट् गुणस्थानानि ज्ञातव्यानि ननु एकस्यैव अनिवृत्तिबादरगुणस्थानस्य सवेदत्वं अवेदत्वं च कथमिति चेत् उच्यते अनिवृत्ति गुणस्थानं षट्भागी क्रियते तत्र प्रथमभागत्रये वेदानाम् अनिवृत्तित्वात् सवेदत्वात् सवेदत्वं अन्यत्र वेदानां निवृत्तित्वाद् अवेदत्वं कषायानुवादेन क्रोधमानमायासु अनिवृत्तिबादरगुणस्थानांतानि नव ज्ञातव्यानि लोभकषाये मिथ्यादृष्ट्यादीनि दश उपशांतकषाय क्षीणकषाय सयोगकेवल्ययोगिकेवलिन श्चैते अकषायाः ज्ञानानुवादेन मत्यज्ञान श्रुताज्ञान विभंगज्ञानेषु आद्यं गुण

(interlinear: दश्व साकरि मा दि ट्टि — नवमा गुणस्थानात् वेदरहित)

(left margin:)
ले रमा गुणस्थान है ६

। इ स्त्री इ नपुंसक आदि का पांचमा गुणस्थान है भाव स्त्री भाव नपुंसक आदि का नवमा गुणस्थान है ५

(right margin:) चत्वारि ४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

११ रणसूक्ष्मसांपरायोपसांतकषायाश्चत्वारः उपसमकास्तेप्रत्येकं एकैकेकत्रगुणस्थानेअष्टगुणसमयेषु एकस्मिन्नेकस्मि
न्समये यथासंख्यंषोडशचतुर्विंशतित्रिंशतषट्त्रिंशत द्विचत्वारिंशत अष्टचत्वारिंशत चतुःपंचाशतचतुःपंचाशत
स३ अष्टमयेषुचतुर्गुणस्थानवर्त्तिनांसामान्येनउत्कृष्टासंख्या १६ २४ ३० ३६ ४२ ४८ ५४ ५४ विशेषेणतुप्रथमादिस
मयेषु एकोवाद्वौवात्रयोवाचेत्यादिषोडशाद्युत्कृष्टसंख्यायावत्प्रतिपत्तव्या उक्तंच सोलसगंचदुवीसं तीसंछ
त्तीसमेवजाणाहि बादालंअडदालं दोचउवण्णयउवसमगा १ तेतुस्वकालेनसमुदिताःसंख्येयाःभवंति नवनवत्यधि
कशतद्वयपरिमानाएकत्रैकत्रगुणस्थानेभवंतीत्यर्थः २९९ तदुक्तं नवनवदोएकठाणेउवसंता ननुचाष्टम स
मयेषुषोडशादीनांसमुदितानांचतुरधिकंसतत्रयंभवति कथमुक्तंनवनवत्यधिकशतद्वयं सत्यं अष्टमसमयेषु
उपशामिकानिरंतराभवंति परिपूर्णानलभ्यंते किंतुपंचहीनाभवंतीतिचतुर्णांगुणस्थानवर्त्तिनामपि उपशमिकानां
समुदितानां षण्णवत्यधिकानिएकादशशतानिभवंति ११९६ अपूर्वकरणानिवृत्तिकरणसूक्ष्मसांपरायक्षीणक
षायायोगकेवलिनश्च एतेषामष्टधासमयक्रमःपूर्ववद्द्रष्टव्यः केवलंतेषामुपशमकेभ्योद्विगुणसंख्या तदुक्तं
बत्तीसंअडदालं सट्ठीबावत्तरीयचुलसीदी छण्णउदीअठुत्तर अठुत्तरसयंचबोधव्वा ३२ ४८ ६० ७२ ८४ ९६ १०८ १०८
अत्रापिएकोवाद्वौवात्रयोवा इत्याद्युत्कृष्टाष्टसमयःप्रवेशापेक्षयोक्तं सकालेसमुदिताःप्रत्येकमष्टवेनेत्युत्तरपंच ११
शतपरिमानाभवंति ५९८ ननुअत्रापिषट्शतानिअष्टाधिकानिभवंति कथमष्टनवत्यधिकानिपंचशतान्युक्तानि

मिले २

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0 In Public Domain. Digitized by Sarayu Trust/eGangotri

मनोव्यापारसावीत्र

व संज्ञानुवादेन संज्ञिषु आदितो द्वादशगुणस्थानानि संति असंज्ञिषु प्रथममेकमेव गुणस्थानं सत् अंत्यगुणस्थानद्वयं सं
ज्ञासंज्ञिव्यपदेशरहितं आहारानुवादेन आहारकेषु आदितस्त्रयोदशगुणस्थानानि संति अनाहारकेषु विग्रहगति
षु मिथ्यादृष्टिसासादनसम्यग्दृष्टि असंयतसम्यग्दृष्टिगुणस्थानत्रयमस्ति समुद्घातावसरे सयोगकेवली अयोगकेवली सिद्ध
श्च गुणस्थानरहिताः ॥इति सत्प्ररूपणा समाप्ता ॥ अथ संख्याप्ररूपणा प्रारभ्यते संख्या द्विप्रकारा सामान्यविशे
षभेदात् सामान्येन मिथ्यादृष्टयो जीवा अनंतानंतसंख्या सासादनसम्यग्दृष्टयः सम्यग्मि[थ्या]दृष्टयः असंयतस
म्यग्दृष्टयः देशसंयताश्च पल्योपमासंख्येयभागसंख्या तथाहि द्वितीयगुणस्थाने द्वापंचाशत्कोटयः ५२००००००० तृती
यगुणस्थाने चतुरधिकाशतकोटयः १०४००००००० चतुर्थगुणस्थाने सप्तशतकोटयः ७०००००००००० पंचमगुणस्थाने त्रयोद
शकोटयः १३००००००० उक्तं च तेरहकोडीदेसे बावण्णासासणे मुणेयव्वा मिस्सा वि य तद्दूणा असंजया सत्तसयकोडी
उक्तं च प्रमत्तसंयताः कोटीपृथक्त्वसंख्या पृथक्त्वमिति कोर्थः आगमभाषया तिसृणां कोटीनामुपरि नवानां कोटीना
मधस्तात् तत्पृथक्त्वमिति संज्ञा तथापि प्रमत्तसंयतानां निर्धारितं संख्याकथ्यते कोटीपंचकं त्रिनवतिलक्षाः
अष्टानवतिसहस्रा सत द्वयं षट् च वेदितव्या ५९३९८२०६ अप्रमत्तसंयतासंख्येया सा संख्या न ज्ञायते इति चेदुच्यते को
टी द्वयं षण्णवतिलक्षाः नवनवतिसहस्राः शतमेकं अधिकं प्रमत्तसंयतार्द्धपरिमाणमित्यर्थः २९६९९१०३ तदुक्तं छस्सुण्ण
वेणि अट्ठय णव तिय णव पंच होंति पमत्ता तानद्धमप्पमत्ता गुणठाणं जुगे जिणुद्दिट्ठा १ अपूर्वकरणनिवृत्तिक

५९३९८२०६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जोजन जितै नाप्रदेशहोय

१२ मभूमियावत् मिथ्यादृष्टयो नारकाः श्रेण्यसंख्येयभागप्रमितास्स चासंख्येयभागः असंख्येययोजनकोटीकोट्यः सर्वासु न

नारकीक नारकीक नारकीक असंख्यात मैं भाग

रकभूमिषु सासादनसम्यग्दृष्टयः सम्यग्मिथ्यादृष्टयः असंयतसम्यग्दृष्टयश्च पल्योपमस्यासंख्येयभागप्रमिताः संति

अथ सासादनादयः पुनरुच्यंते तथा हि देशाविरतानां त्रयोदशकोटयः सासादनानां द्विपंचाशत्कोटयः मिश्राणां चतुरधि

कं कोटिशतं असंयतसम्यग्दृष्टीनां कोटिसप्तशतानि सप्त उक्तं च तेरहकोटीदेशे बावण्णं सासने मुणेयव्वा तद्दूण मिस्स

गुणे असंजददसस्सकोडिसया १ अत्र बालावबोधनार्थत्वात् पुनरुक्तदोषो न ग्राह्यः अथ तिर्यग्गतिजीवसंख्या कथ्य

ते तत्र मिथ्यादृष्टयोऽनंताः सासादनसम्यग्दृष्टयः सम्यग्मिथ्यादृष्टयोऽसंयतसम्यग्दृष्टयः देशसंयताः पल्यासंख्येय असंख्यात प्रागै है ६

भागमिताः सत्वसंख्येयभागोऽसंख्येया जोजनकोटीकोट्यः सासादनसम्यग्दृष्टयः सम्यग्मिथ्यादृष्टयः असंयतस

एवा उगलख्यान जोधिछे कहा गो जाण ॥

म्यग्दृष्टयो देशासंयता संख्येयाः प्रमत्तसंयतादीनां सामान्योक्तसंख्या देवगतौ मिथ्यादृष्टयः असंख्यश्रेण्यः प्रतरा

संख्येयभागप्रमिताः सासादनसम्यग्दृष्टिः सम्यग्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टयः पल्यासंख्येयभागप्रमिताः इंद्रिया

नुवादेन एकेंद्रियमिथ्यादृष्टयो द्वित्रिचतुरिंद्रिया असंख्येयाः श्रेण्यः प्रतरासंख्येयप्रमिताः पंचेंद्रियेषु प्रथमगुणस्था

नाः असंख्येयाः श्रेण्यः प्रतरासंख्येयभागप्रमिताः पंचेंद्रियेषु सासादनसम्यग्दृष्ट्यादयो देशगुणस्थानवर्त्तिनः सामा

प्रतर और श्रेणी छै न्योक्तसंख्या कायानुवादेन पृथिव्यप्तेजोवायुकायिकाः असंख्येया लोकाः अथ को यं लोको [illegible] नाममानविशे १२

षः प्रतरश्रेणिगुणितो लोको भवति वनस्पतिकायिकाः अनंतानंताः त्रसकायिकसंख्या पंचेंद्रियवत् योगानुवादेन

असंख्या का उ का और देश होय

मनुष्यगतौ मिथ्यादृष्टयः श्रेण्यसंख्येयभागमिताः ७ जोजनके

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सत्वं उपशामकेनयथापंचहीयंते तथाक्षपकेषुद्विगुणहाणोदशहीयंते तेनएकगुणस्थानेपंचशतानिअष्टनव
त्यधिकानिभवंति ५९८ गुणस्थानपंचकवर्तिनांक्षपकानांगुणसमुदितानांदशोनानित्रीणिसहस्राणिभवंति तदु
क्तं खीणकसायाणपुणोतिसिसहस्सादसूणगाभणिया २९९० सयोगकेवलिनामप्युपशामकेभ्योद्विगुणत्वात्
समयेषुप्रथमादिसमयक्रमेण एकोवाद्वौवात्रयोवाचत्वारइत्याद्युत्कृष्टसंख्यायावत्संख्याभेदःप्रतिपत्तव्यः नन्वेव
मुदाहृतक्षपकेभ्योभेदेनाभिधानमेषा मनर्थकमितिचेन्नः स्वकालसमुदितासंख्यापेक्षया तेषांतेभ्योविशेषसंभ
वात् सयोगकेवलिनोहिस्वकालेनसमुदितालक्षपृथक्त्वसंख्याभवंति अष्टलक्षाष्टनवतिसहस्रद्व्यधिकपंचशत
परिमाणंभवंतीत्यर्थः ८९८५०२ तदुक्तं अट्ठेवयसयसहस्सा अट्ठाणउदीयतहसहस्साइं संखाजावजिणाणं पंचे
थे वसयाविउत्तराहोंति १ सर्वेप्येतेप्रमत्ताद्ययोगकेवल्यंताःसमुदिताः उत्कृष्टेणयदिकदाचिदेकस्मिन्समयेभवंति
तदात्रिहीननवकोटिसंख्याएवभवंति ८९९९९९९७ उक्तंच सत्तादीअट्ठंता छण्णवमज्झायसंयदासव्वे अंजलिमौलि
यहत्थे तियरणसुद्धेणमंसामि १ ॥इतिसामान्यसंख्यासमाप्ता अथविशेषसंख्याप्रारभ्यते विशेषेणगत्यनुवादे
न नरकगतौप्रथमनरकभूमौनारकामिथ्यादृष्टयःअसंख्याश्रेणयःकोर्थःप्रतरासंख्येयभागप्रमिताइत्यर्थः अथकेयं
श्रेणिरितिचेदुच्यते सप्तरज्जुकमयीमुक्ताफलमालावत् आकाशप्रदेशपंक्तिःश्रेणिरुच्यते मानविशेषइत्यर्थः
प्रतरासंख्यातभागप्रमितानामसंख्यातानांश्रेणीणांयावंतःप्रदेशास्तावंतस्तत्रनारकाइत्यर्थः द्वितीयनरकभूम्यादिषुसप्त

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सातमे गुणस्थाना ६१

१३ यतादयः संख्येयाः पंचमज्ञानासयोगा अयोगाश्च सामान्योक्तसंख्या॥ संयमानुवादेन सामायिकछेदोपस्थापनसुद्धिसंय मथ
ताः प्रमत्तसंयतादयश्चतुर्गुणस्थानाः सामान्योक्तसंख्या॥ परिहारसुद्धिसंयताः प्रमत्तसंयताः अप्रमत्तसंयताश्च संख्येयाः
सूक्ष्मसांपरायसुद्धिसंयता यथाख्यातविहारसंयता देससंयता असंयताश्च सामान्योक्तसंख्या॥ दर्शनानुवादेन चक्षुदर्शी
निनो मिथ्यादृष्टयोऽसंख्येयाः श्रेणयः प्रतरासंख्येयभागप्रमिताश्च॥ अचक्षुदर्शिनिनो मिथ्यादृष्टयोनंतानंता॥ चक्षुदर्शनि
नोरचक्षुदर्शनिश्च सासादनसम्यग्दृष्ट्यादयएकादशगुणस्थानाः सामान्योक्तसंख्या॥ अवधिदर्शनिनस्तृतीयज्ञानिवत्॥ के
वलदर्शनिनः केवलज्ञानिवत्॥ लेश्यानुवादेन कृष्णनीलकपोतलेस्यासु आदितश्चतुर्गुणस्थानाः सामान्योक्तसंख्या॥ तेजःप
द्मलेश्ययोः रादितः पंचगुणस्थानाः॥ स्त्रीवेदवत्वेदितव्याः॥ मिथ्यादृष्टयोऽसंख्येयाः श्रेणयः प्रतरासंख्येयभागप्रमिताः॥ सासाद
चारि गुण स्थानताई
नसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टिसंयतासंयताः सामान्योक्तसंख्यावेदितव्या इत्यर्थः॥ तेजःपद्मलेश्ययोः प्र
मत्ताप्रमत्तसंयताः संख्येयाः॥ शुक्ललेश्यायामादितः पंचगुणस्थानाः पल्योपमासंख्येयभागप्रमिताः॥ शुक्ललेश्यायां प्रमत्ताप्रमत्तसंयता
संख्येयाः॥ शुक्ललेश्यायां अपूर्वकरणादिसप्तगुणस्थानाः सामान्योक्तसंख्या॥ भव्यानुवादेन भव्येषुचतुर्दशगुणस्थानेषुसामान्यो
क्तसंख्या॥ अभव्यानंतानंताः॥ सम्यक्त्वानुवादेन क्षायिकसम्यग्दृष्टिषु असंयतसम्यग्दृष्टयः पल्यासंख्येयभागप्रमिताः॥ क्षायिक
सम्यग्दृष्टिषुदेशासंयतादयः सप्तगुणस्थानासंख्येयाः॥ अपूर्वकरणक्षपकाः अनिवृत्तिकरणक्षपकाः सूक्ष्मसंपरायक्ष १३
पकाः क्षीणकषायाश्चेति चत्वारः सयोगकेवलिनोऽयोगिकेवलिनश्च सामान्योक्तसंख्या॥ संज्ञ्यनुवादेन संज्ञिषु मिथ्यादृ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मनोयोगिनो वाग्योगिनश्च मिथ्यादृष्टयो ऽसंख्येयाः श्रेणयः प्रमिता संख्येय भागप्रमिताः॥ काययोगिनो मिथ्या
दृष्टयो नंतानंता॥ त्रियोगवतां मध्ये सासादनसम्यग्दृष्टयः सम्यग्मिथ्यादृष्टयो ऽसंयतसम्यग्दृष्टयो देशसं सं२
ता पल्यासंख्येयप्रमिता॥ प्रमत्ताद्यष्टगुणवर्त्तिनः संख्येया॥ अयोगकेवलिनः सामान्योक्तसंख्याः॥ वेदानुवादेन
स्त्रीवेदा पुंवेदाश्च मिथ्यादृष्टयो ऽसंख्येयाः श्रेणयः प्रतरासंख्येयभागप्रमिता॥ नपुंसकवेदा मिथ्यादृष्ट
योनंतानंता॥ स्त्रीवेदा नपुंसकवेदाश्च सासादनसम्यग्दृष्ट्यादि चतुर्गुणस्थानवर्त्तिनः सामान्योक्तसंख्या॥ प्रमत्तसं
यतादयश्चतुर्गुणस्थानवर्त्तिनः सामान्योक्तसंख्या॥ पुंवेदा सासादनसम्यग्दृष्ट्याचतुर्गुनः स्थानवर्त्तिनः संख्येयाः सा
मान्योक्तसंख्या॥ अवेदा अनिवृत्तिवादरादयः षट्गुणस्थानाः सामान्योक्तसंख्या॥ कषायानुवादेन क्रोधमानमायासु
मिथ्यादृष्टि सासादनसम्यग्मिथ्यादृष्टि असंयतसम्यग्दृष्टि संयतासंयताः सामान्योक्तसंख्याः॥ प्रमत्तसंयतादयः च
त्वारः संख्येयाः॥ लोभकषायानामप्युक्त एव क्रमोस्ति॥ परंतु अयं विशेषः यत्सूक्ष्मसंपरायसंयताः सामान्योक्तसंख्याः॥
अकषाया उपसांतकषादयः चत्वारः सामान्योक्तसंख्याः॥ ज्ञानानुवादेन मत्यज्ञानिनः श्रुताज्ञानिनो मिथ्यादृष्टयः सासाद
नसम्यग्दृष्टयः सामान्योक्तसंख्या॥ कुअवधये मिथ्यादृष्टयो ऽसंख्येयाः श्रेणयः प्रतरासंख्येयप्रमिताः॥ सासादनसम्यग्दृष्टयो
विभंगज्ञानिनः पल्योपमासंख्येयभागप्रमिताः॥ मतिश्रुतज्ञानिनो असंयतसम्यग्दृष्ट्यादयो नवगुणस्थाना सामान्योक्तसंख्या (चौथा गुणस्थान) (अवधि ज्ञान)
तृतीयज्ञानिन चतुर्थपंचमगुणस्थाना सामान्योक्तसंख्या॥ प्रमत्तसंयतादयः सप्तगुणस्थानाः संख्येयाः॥ चतुर्थज्ञाना प्रमत्तसं

मति कुश्रुति ज्ञानधारी मिथ्यादृष्टि और सासादनसम्यग्दृष्टि गुणस्थानवर्ती॥

Ganesh Varni Digambar Jain Institute, Narja, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पूर्वापरतः आत्मप्रसर्पणं द्वितीयसमये करोति एष विचारः संस्कृतमहापुराणपंजिकायामस्ति प्रतरावस्थापेक्षया असंख्ये
या भागा ज्ञातव्या प्रतरावस्थायां सयोगकेवली वातवलयत्रयादर्वागेवात्मप्रदेशैर्लोकं व्याप्नोति लोकपूरणावस्थायां वात
वलयत्रयमपि व्याप्नोति तेन सर्वलोकः क्षेत्रं विशेषेण तु गत्यनुवादेन नरकगतौ नारकाणां चतुर्षु गुणस्थानेषु सर्वासु पृथि
वीषु लोकस्यासंख्येयभागः तिर्यग्गतौ तिरश्चां आदितः पंचगुणस्थानानां सामान्योक्तं क्षेत्रं कोर्थः मिथ्यादृष्टीनां सर्व
लोकः सासादनादीनां संयतासंयतानां लोकस्यासंख्येयभागः मनुष्यगतौ मनुष्याणां सयोगिकेवलिवर्ज्जितानां सर्वगुण
स्थानानां लोकस्यासंख्येयभागः सयोगकेवलिनां तु सामान्योक्तं क्षेत्रं असंख्येयभागो ऽसंख्येया भागा वा सर्वलोको वा इ
त्यर्थः देवगतौ देवानां चतुर्गुणस्थानेषु सर्वेषां लोकस्यासंख्येयभागः इंद्रियानुवादेन एकेंद्रियाणां सर्वसंभवात् सर्वो लो
कः क्षेत्रं विकलेंद्रियाणां लोकस्यासंख्येयभागः क्षेत्रं देवनारकमनुष्यवत् तेषां नियतोत्पादस्थानत्वात् विकलास्त्रि
ष्वतृतीये द्वीपे लवणोदकालोदसमुद्रद्वये स्वयंभूरमणद्वीपार्द्धपरभागे स्वयंभूरम[illegible]नसमुद्रे चोत्पद्यंते न पुनरसंख्य
द्वीपसमुद्रेषु न च नरकस्वर्गभोगभूम्यादिषु पंचेंद्रियाणां मनुष्यवत् नियतं क्षेत्रं तथा हि आमानुषोत्तरान्मनुष्या इ
ति वक्ष्यमाणसूत्रबलेन यथा मनुष्याणां लोकस्यासंख्येयभागः क्षेत्रं नियतं वर्त्तते तथा पंचेंद्रियाणां नरके तिर्यग्लोके देव
लोके च त्रसनाडिमध्ये नियतेष्वेव स्थानेषूत्पादो वर्त्तते तेन लोकस्यासंख्येयभागः क्षेत्रं पंचेंद्रियाणां ज्ञातव्यं कायानुवादेन २४
पृथिव्यप्तेजोवायुवनस्पतिकायानां सर्वलोकः क्षेत्रं त्रसकायिकानां पंचेंद्रियवल्लोकस्यासंख्येयभागः क्षेत्रं योगानुवा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ष्यादयोद्वादशगुणस्थानाचक्षुर्दर्शनिवत् तथाहि मिथ्यादृष्टयोऽसंख्येयाश्रेण्यः प्रतरासंख्येयभागप्रमिताः अन्येए
कादशासामान्योक्तसंख्याः असंज्ञिनो मिथ्यादृष्टयोऽनंतानंताः नसंज्ञिनोनाप्यसंज्ञिनोयेतेसामान्योक्तसंख्याः आ
हारानुवादेन अनाहारकेषुआदितस्त्रयोदशगुणस्थानाः सामान्योक्तसंख्याः अनाहारकेषुमिथ्यादृष्टयः सासादनसम्य
ग्दृष्टयोऽसंयतसम्यग्दृष्टयश्चसामान्योक्तसंख्याः मिश्रास्तु अनाहारकानभवंतिमृतेरभावात् तथाचोक्तं मिश्रेक्षी
णकषायेच मरणंनास्तिदेहिनां शेषेष्वेकादशस्वस्ति मृतिरित्यविरेविदः १ अनाहारकेषुसयोगकेवलिनःसंख्येयाः
यत्केषुचित्सयोगकेवलिषुसमुद्घातोवर्त्तते केषुचित्समुद्घातोनास्ति येसमुद्घातास्तेअनाहारकाः अनाहारकेषु
अयोगकेवलिनःसामान्योक्तसंख्याः इतिसंख्यानुयोगःसमाप्तः अथेदानींक्षेत्रप्ररूपणंकथ्यते सामान्यविशेषभे
दात् क्षेत्रंद्विप्रकारं तत्रसामान्येनमिथ्यादृष्टीनांक्षेत्रंसर्वलोकः सासादनसम्यग्दृष्टीनांसम्यग्मिथ्यादृष्टीनांअसं
अनिवृत्तिगुणस्थान
यतसम्यग्दृष्टीनांसंयतासंयतानांप्रमत्तसंयतानामप्रमत्तानामपूर्वकरणानामणिवृत्तिबादरसंपरायाणामुपशान्तकषा-
याणांक्षीणकषायानामयोगिकेवलिनां क्षेत्रंलोकस्यासंख्येयभागः सयोगकेवलिनांलोकस्यासंख्येयभागः लोकस्यासं
ख्येयभागावासर्वलोकोवा सतुलोकस्यासंख्येयभागोदंडकपाटापेक्षयाक्षेत्रंज्ञातव्यं तत्कथंदंडसमुद्घातंकायोत्सर्गेण
स्थितश्चेत् द्वादशांगुलप्रमाणसमवृत्तं मूलशरीरप्रमाणसमवृत्तंवा उपविष्टश्चेत्शरीरत्रिगुणबाहुल्यंवाधूनलोकोदयं
वाप्रथमसमयेकरोति कवाटसमुद्घातंधनुःप्रमाणबाहुल्योदयःपूर्वाभिमुखश्चेत् दक्षिणोत्तरतःकरोति उत्तराभिमुखश्चेत्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१५ श्यानां आदितश्चतुर्गुणस्थानानां सामान्योक्तं क्षेत्रं तेजःपद्मलेश्यानामादितः षड्गुणस्थानानां लोकस्यासंख्येयभागः
क्षेत्रं शुक्ललेश्यानामादितो द्वादशगुणस्थानानां लोकस्यासंख्येयभागः क्षेत्रं सयोगकेवलिनामलेश्यानां आदिश्चतुर्गुण-
स्थानानां सामान्योक्तं क्षेत्रं भव्यानुवादेन भव्यानां चतुर्दशगुणस्थानेषु सामान्योक्तं क्षेत्रं अभव्यानां सर्वलोकः क्षेत्रं सम्यक्त्वा-
त्रयस्त्रिंशत्सागरोपमानि देशोनानि सासादनसम्यग्दृष्ट्याद्यनिवृत्त्युपशमकांतानांसामान्योक्तं अनिवृत्तिबाद
रोपशमकं चतुर्गुणस्थानमंतेयेषामिति ग्राह्यं नवमगुणस्थानस्यनवभागीकृतस्यतृतीयेभागेनपुंसवेदोनिवर्त्तते च
तुर्थभागेस्त्रीवेदोनिवर्त्तते षष्ठेभागेपुंवेदोनिवर्त्तते यतः द्वयोःक्षपकयोःस्त्रीवेदवत् तत्कथं नानाजीवापेक्षयाजघ
न्येनेकसमयः उत्कर्षेणषट्त्रिंशामासाः [१८ मासाः] एकंजीवंप्रतिनास्त्यंतरमित्यर्थः वेदरहितेषुअनिवृत्तिबादरोपशमकसूक्ष्म
संपरायोपशमकयोर्नानाजीवापेक्षयासामान्योक्तं एकंजीवंप्रतिजघन्यमुत्कृष्टंचांतर्मुहूर्तः उपशांतकषायस्यनाना
जीवापेक्षयासामान्यवत् एकंजीवंप्रतिनास्त्यंतरं तस्याधोगुणस्थानेसवेदत्वात् क्षीणकषायादीनामवेदानांसामान्यवत्
कषायानुवादेन क्रोधमानमायालोभकषायाणांमिथ्यादृष्ट्याद्यनिवृत्त्युपशमकानांमनोयोगिवत् द्वयोःक्षपकयो
र्नानाजीवापेक्षयाजघन्येनेकसमयः उत्कर्षेणसंवत्सरः [१८ मास] सातिरेकः केवललोभस्यसूक्ष्मसांपरायोपशमकस्यनानाजीवापे
क्षयासामान्यवत् एकंजीवंप्रतिनास्त्यंतरं केवललोभस्यसूक्ष्मसांपराये क्षपकस्यसामान्यवत् एकंजीवंप्रतिनास्त्यंतरं केवल
लोभस्यसूक्ष्मसांपरायक्षपकस्यसामान्यवत् एकंजीवंप्रतिनास्त्यंतरं अकषायेषुउपशांतकषायस्यनानाजीवापेक्षयासामा
न्यवत् एकंजीवंप्रतिनास्त्यंतरं क्षीणकषायसयोगायोगिकेवलिनांसामान्यवत् ज्ञानानुवादेन मत्यज्ञानश्रुताज्ञानविभंगज्ञा
नेषु मिथ्यादृष्टेर्नानाजीवापेक्षयाएकजीवापेक्षयाचनास्त्यंतरं सासादनसम्यग्दृष्टेर्नानाजीवापेक्षयासामान्यवत् ज

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२९ सागरोपमसहस्रे देशोने चतुर्णामुपशमकानां नानाजीवापेक्षया सामान्योक्तं एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः उत्कर्षेण द्वे सा
गरोपमसहस्रे देशोने चतुर्णां क्षपकाणां क्षीणकषायांतानां सामान्योक्तं अचक्षुदर्शनिषु मिथ्यादृष्ट्यादिक्षीणकषायांता
नां सामान्योक्तमंतरं अवधिदर्शनिनः अवधिज्ञानिवत् केवलदर्शनिनः केवलज्ञानिवत् लेश्यानुवादेन कृष्णनीलका
पोतलेश्येषु मिथ्यादृष्ट्यसंयतसम्यग्दृष्ट्योर्नानाजीवापेक्षया नास्त्यंतरं एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः उत्कर्षेण त्रिंशत्सागरो
पमाणि देशोनानि सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योर्नानाजीवापेक्षया सामान्यवत् एकजीवं प्रति जघन्येन पल्योप
मासंख्येयभागोंतर्मुहूर्त्तश्च उत्कर्षेण त्रयस्त्रिंशत्स सप्तदशसप्तसागरोपमानि देशोनानि तेजःपद्मलेश्ययोर्मिथ्यादृष्ट्यसंय
तसम्यग्दृष्ट्योर्नानाजीवापेक्षया नास्त्यंतरं एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः उत्कर्षेण द्वे सागरोपमे अष्टादशसागरोपमाः
सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योर्नानाजीवापेक्षया सामान्यवत् एकजीवं प्रति जघन्येन पल्योपमासंख्येयभागोंतर्मुहू
र्त्तश्च उत्कर्षेण द्वे सागरोपमे अष्टादशसागरोपमानि सातिरेकाणि संयतासंयतप्रमत्ताप्रमत्तसंयतानां नानाजीवापेक्षया
एकजीवापेक्षया च नास्त्यंतरं कस्मात् परावर्त्तमानलेश्यत्वात् शुक्ललेश्येषु मिथ्यादृष्ट्यसंयतसम्यग्दृष्ट्योर्नानाजीवापेक्षया
नास्त्यंतरं एकजीवं प्रति जघन्येनांतर्मुहूर्त्तः उत्कर्षेण एकत्रिंशत्सागरोपमाणि देशोनानि सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृ
ष्ट्योर्नानाजीवापेक्षया सामान्यवत् एकजीवं प्रति जघन्येन पल्योपमासंख्येयभागोंतर्मुहूर्त्तश्च उत्कर्षेण एकत्रिंशत्सागरोपमाणि २९
संयतासंयतप्रमत्तसंयतयोस्तेजोलेश्यवत् शुक्ललेश्याया अंतरं अप्रमत्तसंयतस्य नानाजीवापेक्षया नास्त्यंतरं शुक्ललेश्येषु अ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

र्यय ज्ञानमपरित्यजंतः प्रमत्ताप्रमत्तगुणस्थाने वर्त्तंते यावत्पूर्वकोटीकालत्रोधः पुनस्तदारोहणं कुर्वंतीति देशोनाः चतुर्णां प
कानां अवधिज्ञानिवत् नानाजीवापेक्षया जघन्येनैकसमयः उत्कर्षेण वर्षपृथक्त्वं एकंजीवंप्रतिनास्त्यंतरमित्यर्थः सयोगायोगकेवलि
ज्ञानिनोः सामान्यवत् संयमानुवादेन सामायिकछेदोपस्थापनशुद्धिसंयतेषु प्रमत्ताप्रमत्तसंयतयोर्नानाजीवापेक्षया नास्त्यंतरं
एकंजीवंप्रतिजघन्यमुत्कृष्टंचांतर्मुहूर्त्तः द्वयोरुपसमकयोर्नानाजीवापेक्षया सामान्यवत् एकंजीवंप्रतिजघन्येनांतर्मुहूर्त्तः उ
त्कर्षेण पूर्वकोटीदेशोनाः तत्कथं अष्टवर्षानंतरं तपोगृहीत्वा उपशमश्रेणीमारुह्यपतितः प्रमत्ताप्रमत्तयोः पूर्वकोटीकाले
स्थयावद्स्थित्वा पुनस्तदारोहणं करोतीति देशोना द्वयोः क्षपकयोः सामान्यवत् परिहारसंयतेषु प्रमत्ताप्रमत्तसंयतयोः नानाजी
वापेक्षया नास्त्यंतरं एकंजीवंप्रतिजघन्यमुत्कृष्टंचांतर्मुहूर्त्तः सूक्ष्मसांपरायशुद्धिसंयमे उपसमकस्य नानाजीवापेक्षया सा
मान्यवत् एकंजीवंप्रतिनास्त्यंतरं कस्मात् गुणांतरे सूक्ष्मसांपरायसंयमासंभवात् सूक्ष्मसांपरायक्षपकस्य सामान्यवत् यथा
ख्याते अकषायवत् संयतासंयतस्य नानाजीवापेक्षया एकजीवापेक्षया च नास्त्यंतरं असंयतेषु मिथ्यादृष्टेर्नानाजीवापेक्षया नास्त्यं
तरं एकंजीवंप्रतिजघन्येनांतर्मुहूर्त्तः उत्कर्षेण त्रयस्त्रिंशत्सागरोपमानि देशोनानि सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्य
संयतसम्यग्दृष्टीनां सामान्यवत् दर्शनानुवादेन चक्षुर्दर्शनिषु मिथ्यादृष्टेः सामान्यवत् सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्यो
र्नानाजीवापेक्षया सामान्यवत् एकंजीवंप्रतिजघन्येन पल्योपमासंख्येयभागोंतर्मुहूर्त्तश्च उत्कर्षेण द्वे सागरोपमसहस्रे देशोने असं
यतसम्यग्दृष्टिसंयतासंयतप्रमत्तसंयताप्रमत्तसंयतानां नानाजीवापेक्षया नास्त्यंतरं एकंजीवंप्रतिजघन्येनांतर्मुहूर्त्तः उत्कर्षेण द्वे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

४ ततकथं उपशांतकषायैकजीवंप्रतिनास्त्यंतरं ॥
२० संयतस्यनानाजीवापेक्षयाजघन्येनैकसमयः उत्कर्षेणचतुर्दशरात्रिंदिनानि एकंजीवंप्रतिजघन्यमुत्कर्षंचांतर्मुहूर्तःसंयता
संयतस्यनानाजीवापेक्षयाजघन्येनैकसमयः उत्कर्षेणचतु र्दशरात्रिंदिनानि एकंजीवंप्रतिजघन्यमुत्कर्षंचांतर्मुहूर्त
प्रमत्ताप्रमत्तसंयतयोर्नानाजीवापेक्षयाजघन्येनैकसमयः उत्कर्षेणपंचदशरात्रिंदिनानि एकंजीवंप्रतिजघन्यमुत्कर्षंचांत
र्मुहूर्तः एतत्कथं ऊपसमिकासंयतसम्यग्दृष्टीनांसांतरत्वात् नानाजीवासप्तरात्रिंदिनानि ऊपशमिकसम्यग्दृष्टे
परिकल्पिरपिनग्रहणानि तदासप्तरात्रिंदिनान्येव संयतासंयतस्यचतुर्दशरात्रिंदिनानिप्रमत्ताप्रमत्तयोःपंचदशरा
त्रिंदिनानि एकंजीवंप्रतिजघन्येनोत्कर्षेणचांतर्मुहूर्तांतरं तथाचोक्तं सम्मत्तेसत्तदिना विरदाविरदेसुचउदसाहों
ति विरदेसुदोसुपण्णरस विरहणकालोयवोधव्वो १ चयाणमुपशमकाणांनानाजीवापेक्षयाजघन्येनैकसमयः उत्कर्षेण
वर्षपृथक्त्वं एकंजीवंप्रतिजघन्यमुत्कर्षंचांतर्मुहूर्तः उपशांतकषायस्यनानाजीवापेक्षयासामान्यवत् एकंजीवंप्रतिनास्त्यंतरं
वेदकपूर्वकोपशमकश्रेण्यारोहणाभाव भवति तस्याःपतितोनंततैवश्रेण्यारोहणंकरोति सम्यक्त्वांतरंमिथ्यात्वं
वागत्वापश्चात्तदारोहणंकरोति अतोनास्तितस्यांतरं सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्ट्योर्नानाजीवापेक्षयाजघन्येनै
कसमयः उत्कर्षेणपल्योपमासंख्येयभागः एकंजीवंप्रतिनास्त्यंतरं सासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्टिलब्धुत्वे
कजीवंप्रतिनास्त्यंतरंकथमितिचेत् गुणेगुणांतरविरोधतः सासादनादिगुणेस्थितस्यमिथ्यात्वादिनान्तरासंभवात् मि
थ्यादृष्टिनानाजीवापेक्षया एकजीवापेक्षयाचनास्त्यंतरं संज्ञानुवादेन संज्ञिषुमिथ्यादृष्टेःसामान्यवत् सासादनसम्य

कोंमे गिरै सो उस
श्रेणी न चढै उप
समसम्यक्त छूटै
कैतो वेदक मै आवै
कै मिथ्यात्व गुणस्था
न मै आवै फेर उपस
मसम्यक्त लै फेर श्रे
णी चढै इसतै अंतर
नही

Ganesh Varni Digambar Jain Institute, Naria, Varanasi.

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रमत्तादीनामुपशमश्रेण्यारोहणाभिमुख्यारोहणसद्भावाभ्यां लेश्यांतरपरावर्त्तीभावात् एकंजीवंप्रतिजघन्येमुत्कृष्टंचांतर्मुहू
र्त्तः अपूर्वकरणानिवृत्तिकरणसूक्ष्मसांपरायोपशमकानांत्रयाणांनानाजीवान्प्रपेक्ष्यासामान्यवत् एकंजीवंप्रतिनास्त्यंतरं
कस्मात् उपशांतकषायस्यापतितस्यप्रमत्तलेश्यांतरमसंसाध्यश्रेण्यारोहणादेकंजीवंप्रतिनास्त्यंतरं कस्मात् चतुर्णांक्षप
कानांसयोगिकेवलिनामलेश्यानांचसामान्यवत् भव्यानुवादेन भव्येषुमिथ्यादृष्ट्याद्ययोगिकेवल्यंतानांसामान्यवत् अभव्या
चौथेगुणस्थानविषै
नांनानाजीवापेक्षयाएकजीवापेक्षयाचनास्त्यंतरं सम्यक्त्वानुवादेन क्षायिकसम्यक्तदृष्टिषुअसंयतसम्यग्दृष्टेर्नानाजीवापे
क्षयाचनास्त्यंतरं एकंजीवंप्रतिजघन्येनांतर्मुहूर्त्तः उत्कर्षेणपूर्वकोटीदेशोना कस्मात्गुणपरावर्त्तात् संयतासंयतप्रमत्ताप्रम
त्तसंयतानांनानाजीवापेक्षयानास्त्यंतरं एकंजीवंप्रतिजघन्येनांतर्मुहूर्त्तः उत्कर्षेणत्रयस्त्रिंशत्सागरोपमाणिसातिरेकाणि क
स्मात् गुणपरावर्त्तापेक्षया तथैवचतुर्णामुपसमकानांनानाजीवापेक्षयासामान्यवत् एकंजीवंप्रतिजघन्येनांतर्मुहूर्त्तः उत्क
र्षेणत्रयस्त्रिंशत्सागरोपमाणिसातिरेकाणि शेषाणांसामान्यवत् क्षायोपशमिक सम्यग्दृष्टिषुअसंयतसम्यग्दृष्टेर्ना
नाजीवापेक्षयानास्त्यंतरं एकंजीवंप्रतिजघन्येनांतर्मुहूर्त्तः उत्कर्षेणपूर्वकोटीदेशोना संयतासंयतस्यनानाजीवापेक्षयानास्त्यं
तरं एकंजीवंप्रतिजघन्येनांतर्मुहूर्त्तः उत्कर्षेणषट्षष्टिसागरोपमाणिसातिरेकाणि प्रमत्ताप्रमत्तसंयतयोर्नानाजीवापेक्षयाना
स्त्यंतरं एकंजीवंप्रतिजघन्येनांतर्मुहूर्त्तः उत्कर्षेणत्रयस्त्रिंशत्सागरोपमाणिसातिरेकाणि औपशमिकसम्यग्दृष्टिषुअसं
यतसम्यग्दृष्टेर्नानाजीवापेक्षयाजघन्येनैकसमयः उत्कर्षेणसप्तरात्रिंदिनानि एकंजीवंप्रतिजघन्येमुत्कृष्टंचांतर्मुहूर्त्तः संयता

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

३१ वादिति सासादनसम्यग्दृष्टेर्नानाजीवापेक्षया जघन्येनैकसमयः उत्कर्षेण एकंजीवं प्रति नास्त्यंतरं असंयतसम्यग्दृष्टे
र्नानाजीवापेक्षयां जघन्ये नैकसमयः उत्कर्षेण वर्षपृथक्त्वं एकंजीवं प्रति नास्त्यंतरं सयोगकेवलिनः नानाजीवापेक्षया
जघन्येनैकसमयः उत्कर्षेण वर्षपृथक्त्वं एकंजीवं प्रति नास्त्यंतरं अयोगिनां नानाजीवापेक्षया जघन्येनैकसमयः उत्क
र्षेण षण्मासाः एकंजीवं प्रति नास्त्यंतरं अंतरं विज्ञातं समाप्तमित्यर्थः अथ भावस्वरूपं निरूप्यते सामान्यविशेषभेदा
त्सो भावो द्विप्रकारः सामान्येन तावत् मिथ्यादृष्टिरिति औदयिको भावः कस्मात् मिथ्यात्वप्रकृत्युदयप्रादुर्भावात्
सासादनसम्यग्दृष्टिरिति पारिणामिको भावः ननु अनंतानुबंधिक्रोधाद्युदये अस्य प्रादुर्भावात् औदयिकत्वं
कस्मान्नोच्यते इति चेत् अविवक्षितत्वात् दर्शनमोहापेक्षया हि मिथ्यादृष्ट्यादिगुणस्थानचतुष्टयभावो निरूप
यितुमभिप्रेतोऽतः सासादने सम्यक्त्वमिथ्यात्वतदुभयलक्षणस्य त्रिविधस्यापि दर्शनमोहस्योदयक्षयोपशमा
भावात्पारिणामिकत्वं सम्यग्मिथ्यादृष्टिरिति क्षायोपशमिको भावः तथाचोक्तं मिछे खलु उदयाउ विदिए
खलु पारिणामिउ भावो मिस्से खलु उवसमिउ अविरदसम्मम्मि तिण्णेव १ ननु सर्वघातिनामुदयाभावे देश
घातिनां चोदये यः उत्पद्यते भावः स क्षायोपशमिकः न च सम्यग्मिथ्यात्वप्रकृतेर्देशघातित्वं संभवति सर्वघा
तित्वेन आगमेऽस्याः प्रतिपादितत्वात् सत्यं उपचारतोऽस्या देशघातित्वस्यापि संभवात् उपचारनिमित्तं च दे ३१
शतः सम्यक्त्वाघातित्वं न हि मिथ्यात्वप्रकृतिवत् सम्यग्मिथ्यात्वप्रकृत्या सर्वस्य सम्यक्त्वस्वरूपस्य

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ग्दृष्टिसम्यग्मिथ्यादृष्ट्योर्नानाजीवापेक्षया सामान्यवत् एकंजीवंप्रति जघन्येन पल्योपमासंख्येयभागोंतर्मुहूर्तश्च उत्क
र्षेण सागरोपमशतपृथक्त्वं असंयतसम्यग्दृष्टिसंयतासंयतप्रमत्तसंयता।प्रमत्तसंयतनानाजीवापेक्षया नांतरं नास्ति
एकंजीवंप्रति जघन्यतयांतर्मुहूर्तः उत्कर्षेण सागरोपमशतपृथक्त्वं चतुर्णामुपशमकानां नानाजीवापेक्षया सामा
न्यवत् एकंजीवंप्रति जघन्येनांतर्मुहूर्तः उत्कर्षेण सागरोपमशतपृथक्त्वं चतुर्णां क्षपकाणां सामान्यवत् असंज्ञिनां ना
नाजीवापेक्षया एकजीवापेक्षया च नास्त्यंतरं तत्कथं एकगुणस्थानवर्तित्वेन तेषां सासादिनां अंतरासंभवात् ये
संज्ञिनो नाप्यसंज्ञिनस्तेषां सामान्यवत् आहारानुवादेन आहारकेषु मिथ्यादृष्टिः सामान्यवत् सासादनसम्यग्दृ
ष्टिसम्यग्मिथ्यादृष्ट्योर्नानाजीवापेक्षया सामान्यवत् एकंजीवंप्रति जघन्येन पल्योपमासंख्येयभागोंतर्मुहूर्तश्च उ
त्कर्षेण घणांगुलासंख्येयभागः घणांगुलासंख्येयभाग इति कोर्थः असंख्येयासंख्येयानुत्सर्पिण्यवसर्पिण्यः असंयतस
म्यग्दृष्टिसंयतासंयतप्रमत्तसंयतानां नानाजीवापेक्षया नास्त्यंतरं एकंजीवंप्रति जघन्येनांतर्मुहूर्तः उत्कर्षेण अंगुल्यसं
ख्येयभागः असंख्येयासंख्येया उत्सर्पिण्यवसर्पिण्यः चतुर्णामुपशमकानां नानाजीवापेक्षया सामान्यवत् एकंजीवंप्र
ति जघन्येनांतर्मुहूर्तः उत्कर्षेण अंगुलासंख्येयभागोऽसंख्येया उत्सर्पिण्यवसर्पिण्यः चतुर्णां क्षपकाणां सयोगकेवलिनां
च सामान्यवत् अनाहारकेषु मिथ्यादृष्टेर्नानाजीवापेक्षया च नास्त्यंतरं कथमेतत् अनाहारकेषु मिथ्यादृष्ट्येकजीवं
प्रति नास्त्यंतरं अनाहारकत्वस्य एकद्वित्रिसमयत्वात् गुणस्थानस्य च ततो बहुकालत्वात् तत्र तस्य गुणांतरेणांतरासंभ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

३२ श्या नामलेश्याणां च सामान्यवत् भव्यानुवादेन भव्यानां मिथ्यादृष्ट्याद्ययोगिकेवल्यंतानां सामान्यवत् अभव्यानां पारिणामिको भावः स
म्यक्त्वानुवादेन क्षायिकसम्यग्दृष्टिषु असंयतसम्यग्दृष्टेः क्षायिको भावः क्षायिकं सम्यक्त्वं असंयतत्वं पुनरौदयिकेन भावेन संय
तासंयतप्रमत्ताप्रमत्तसंयतानां क्षायोपशमिको भावः क्षायिकं सम्यक्त्वं चतुर्णामुपसमकानामौदयिको भावः क्षायिकं सम्यक्त्वं
शेषाणां सामान्यवत् क्षायोपशमसम्यग्दृष्टिषु असंयतसम्यग्दृष्टेः क्षायोपशमिको भावः क्षायोपशमिकं सम्यक्त्वं असंयतः पुन
रौदयिकेन भावेन संयतासंयतप्रमत्ताप्रमत्तसंयतानां क्षायोपशमिको भावः क्षायोपशमिकं सम्यक्त्वं औपशमिकसम्यग्दृष्टिषु अ
संयतसम्यग्दृष्टेः औपशमिको भावः औपशमिकं सम्यक्त्वं असंयतः पुनरौदयिकेन भावेन संयतासंयतप्रमत्ताप्रमत्तसंयतानामौप
शमिको भावः औपशमिकं सम्यक्त्वं चतुर्णामुपशमकानामौपशमिको भावः औपशमिकं सम्यक्त्वं सासादनसम्यग्दृष्टेः पारिणामिको
भावः सम्यग्मिथ्यादृष्टेः क्षायिको भावः मिथ्यादृष्टेरौदयिको भावः संज्ञानुवादेन संज्ञिनां सामान्यवत् असंज्ञिनामौदयिको भावः येन सं
ज्ञिनाप्यसंज्ञिनः तेषां सामान्यवत् आहारानुवादेन आहारकाणामनाहारकाणां च सामान्यवत् इति भावो विभावितः अथाल्पब
हुत्वं परिवर्ण्यते तद्द्विप्रकारः सामान्यविशेषभेदात् सामान्येन तावत् सर्वतः स्तोकाः त्रय उपसमकाः अष्टसु समयेषु क्रमात्प्रवेशे एको
१२३१२३१२ एकत्रे ३०४ पचेहीनू २९९
वा द्वौ वा त्रयो वा इत्यादि जघन्याः उत्कृष्टास्तु २६ २४ ३० ३६ ४२ ४८ ५४ ५४ स्वगुणस्थानकालेषु प्रवेशेन तुल्यसंख्याः उपशां
तकषायास्तावंत एव संख्याकथनावसरे प्रोक्ताः उपसमकानामितरगुणस्थानवर्त्तिभ्यो ल्पत्वात्प्रथमतः कथनं तत्रापि त्रय उपशाम ३२
कास्सकषायत्वादुपशांतकषायेभ्यो भेदेन निर्दिष्टाः प्रवेशेन तुल्यसंख्याः सर्वेष्वेते षोडशादिसंख्याः त्रयः सूपकासंख्येयगु

१ ग्रंथमेते दूण ६०८

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0. In Public Domain. Digitized by Sarayu Trust/eGangotri

घात: संभवति सर्वोपदिष्टतत्वेषु रुच्यंतरस्यापि संभवात् तदुपदिष्टतत्वेषु रुच्यरुच्यात्मको हि परिणाम: सम्यग्मिथ्यात्व
मित्यर्थ: असंयतसम्यग्दृष्टिरिति औपशमिको वा क्षायिको वा क्षायोपशमिको वा भाव: असंयत: पुनरौदयिकेन भावेन सं
यतासंयत: प्रमत्तसंयताप्रमत्तसंयत इति च क्षायोपशमिको भाव: चतुर्णामुपशमकानामिति औपशमिको भाव: चतुर्षु क्षप
केषु सयोग्ययोगिकेवलिनोश्च क्षायिको भाव: विशेषेण गत्यनुवादेन नरकगतौ प्रथमपृथिव्यां नारकाणां मिथ्यादृष्ट्याद्यसं
यतसम्यग्दृष्ट्यंतानां सामान्यवत् द्वितीयादिष्वा सप्तम्या: मिथ्यादृष्टिसासादनसम्यग्दृष्टिसम्यग्मिथ्यादृष्टीनां सामान्य
वत् असंयतसम्यग्दृष्टेरोपशमिको वा क्षायोपशमिको वा भाव: असंयत: पुनरौदयिकेन भावेन तिर्यग्गतौ तिरश्चां मि
पांच गुणस्थाने
थ्यादृष्ट्याद्यसंयतसम्यग्दृष्ट्यंतानां सामान्यवत् मनुष्यगतौ मनुष्याणां मिथ्यादृष्ट्याद्ययोगिकेवल्यंतानां सामान्यमेव देवगतौ दे
चौदा गुणस्थाने
वानां मिथ्यादृष्ट्याद्यसंयतसम्यग्दृष्ट्यंतानां सामान्यवत् इंद्रियानुवादेन एकेंद्रियविकलेंद्रियाणामौदयिको भाव: पंचेंद्रिये
षु मिथ्यादृष्ट्याद्ययोगिकेवल्यंतानां सामान्यवत् कायानुवादेन स्थावरकायिकाणामौदयिकभाव: त्रसकायिकानां सामान्य
मेव योगानुवादेन कायवाङ्मनसयोगिनां मिथ्यादृष्ट्याद्यसयोगिकेवल्यंतानामयोगिकेवलिनां च सामान्यवत् वेदानुवादेन स्त्री
पुंनपुंसकवेदानामवेदानां च सामान्यवत् कषायानुवादेन क्रोधमानमायालोभकषायाणामकषायाणां च सामान्यवत् ज्ञाना
नुवादेन मतिज्ञानश्रुताज्ञानविभंगज्ञानिनां मतिश्रुतावधिमन:पर्ययकेवलिज्ञानिनां च सामान्यवत् संयमानुवादेन सर्वेषां
संयतानां सामान्यवत् दर्शनानुवादेन चक्षुर्दर्शनाचक्षुर्दर्शनावधिदर्शनकेवलिदर्शनिनां च सामान्यवत् लेश्यानुवादेन षट्ले

मिथ्यादृष्टि आदि चारि गुणस्थाने ५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0:In Public Domain. Digitized by Sarayu Trust/eGangotri

३३ पृथिवीकायिका बहवः तेभ्योऽप्कायिका [illegible] बहवः तेभ्यो वायुकायिका बहवः सर्वेभ्यो वनस्पतयोऽनंतगुणाः त्रसकायिकानां पंचेंद्रियव
त् योगानुवादेन वाग्मनसयोगिनां पंचेंद्रियवत् काययोगिनां सामान्यवत् वेदानुवादेन स्त्रीपुंवेदानां पंचेंद्रियवत् नपुंसकवेदानामवे
दानांच सामान्यवत् कषायानुवादेन क्रोधमानमायाकषायाणां पुंवेदवत् अयं तु विशेषः मिथ्या[illegible]दृष्टयोऽनंतगुणाः लोभकषा
यानां द्वयोरुपशमकयोस्तुल्यसंख्याः ततो द्वयोर्बहवः क्षपकाः संख्येयगुणाः सूक्ष्मसांपरायेषु उपशमकसंयता विशेषाधि
काः सूक्ष्मसांपरायक्षपकाः संख्येयगुणाः शेषाणां सामान्यवत् ज्ञानानुवादेन मत्यज्ञानिश्रुताज्ञानिषु सर्वतः स्तोकाः सा
सादनसम्यग्दृष्टयः मिथ्यादृष्टयोऽसंख्येयगुणाः मतिश्रुतावधिज्ञानिषु सर्वतः स्तोकाः चत्वार उपशमकाः चत्वारः क्षपकाः
संख्येयगुणाः अप्रमत्तसंयताः संख्येयगुणाः प्रमत्तसंयताः संख्येयगुणाः संयतासंयताः असंख्येयगुणाः तिर्यगपेक्षयाऽ
त्वर्थः असंयतसम्यग्दृष्टयोऽसंख्येयगुणाः देवनारकतिर्यग्मनुष्यापेक्षया मनःपर्ययज्ञानिषु सर्वतः स्तोकाः चत्वारः
उपशमकाश्चत्वारः क्षपकाः संख्येयगुणाः अप्रमत्ताः संख्येयगुणाः प्रमत्तसंयताः संख्येयगुणाः केवलज्ञानिषु अयोग
केवलिनः ततकथं अयोगिकेवलिनः एको वा द्वौ वा त्रयो वा उत्कर्षेण अष्टोत्तरशतसंख्याः स्वकालेन समुदिताः तेभ्यः सं
ख्येयाः सयोगिकेवलिनः ८९८५०२ संयमानुवादेन सामायिकछेदोपस्थापनशुद्धि[illegible]संयतेषु द्वयोरुपशमकयोस्तुल्यसंख्याः ३३
ततः संख्येयगुणाः क्षपकाः॥ अप्रमत्ताः संख्येयगुणाः परिहारशुद्धिसंयतेषु अप्रमत्तेभ्यः प्रमत्ताः संख्येयगुणाः॥ सूक्ष्मसंपरायशु
द्धिसंयतेषु उपशमके[illegible]भ्यः क्षपकाः संख्येयगुणाः॥ यथाख्यातविहारशुद्धिसंयतेषु उपशांतकषायेभ्यः क्षीणकषायाः संख्ये
मिथ्यादृष्टयोऽनंतगुणाः विभंगज्ञानिषु सर्वतः स्तोकाः सासादनसम्यग्दृष्टयः ८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

णाः कोर्थः उपशामकेभ्यो द्विगुणाः इत्येवमादिसंख्याविचारे विचारितमिह द्रष्टव्यं सूक्ष्मसांपरायसंयता विशेषाधिकाः तत्र
संयमयुक्तानामुपशामकानामिव क्षपकानामपि ग्रहणात् क्षीणकषायवीतरागछद्मस्थास्तावंतस्तावंत एव सयोगिके
वलिनो ऽयोगिकेवलिनश्च प्रवेशेन तुल्यसंख्याः सयोगिकेवलिनः स्वकालेन समुदिताः संख्येयगुणाः ८९८५०२ अप्रमत्तसंयता
संख्येयगुणाः प्रमत्तसंयताः [illegible] संख्येयगुणाः संयतासंयताः संख्येयगुणाः संयतासंयतानां नास्त्यल्पबहुत्वं एकगुण-
स्थानवर्तित्वात् संयतासंयतानामिव गुणस्थानभेदासंभवात् १३००००००० सासादनसम्यग्दृष्टयः संख्येयगुणाः ५२००
०००० सम्यग्मिथ्यादृष्टयः संख्येयगुणाः १०४००००००० असंयतसम्यग्दृष्टयः संख्येयगुणाः ७००००००००० मिथ्यादृष्टयो ऽ-
नंतगुणाः विशेषेण गत्यनुवादेन नरकगतौ सर्वासु पृथिवीषु नारकेषु सर्वतः स्तोकाः सासादनसम्यग्दृष्टयः सम्यग्मिथ्यादृष्टयः सं-
ख्येयगुणाः असंयतसम्यग्दृष्टयः संख्येयगुणाः मिथ्यादृष्टयो ऽसंख्येयगुणाः तिर्यग्गतौ तिरश्चां सर्वतः स्तोकाः संयतासंयताः शेषे
इतरेषां सामान्यवत् मनुष्यगतौ मनुष्याणामुपशामकादिप्रमत्ताप्रमत्तसंयतानां सामान्यवत् ततः संख्येयगुणाः संयतासंयताः
सासादनसम्यग्दृष्टयः संख्येयगुणाः सम्यग्मिथ्यादृष्टयः संख्येयगुणाः असंयतसम्यग्दृष्टयः संख्येयगुणाः मिथ्यादृष्ट-
यः संख्येयः [illegible] गुणाः देवगतौ देवानां नारकवत् इंद्रियानुवादेन एकेंद्रियविकलेंद्रियेषु गुणस्थानभेदो नास्तीति अल्पबहु-
त्वाभावः इंद्रियं प्रत्युच्यते पंचेंद्रियेभ्यश्चतुरिंद्रियाः बहवः पंचेंद्रियाणां सामान्यवत् अयं तु विशेषः मिथ्यादृष्टयो ऽसंख्येयगु-
णाः कायानुवादेन स्थावरकायेषु गुणस्थानभेदाभावादल्पबहुत्वाभावः कायं प्रत्युच्यते सर्वेभ्यस्तेजःकायिका बहवः तेभ्यः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0 In Public Domain. Digitized by Sarayu Trust/eGangotri

यगुणाः संयतासंयताः असंयतासंयता असंख्येयगुणाः असंयतसम्यग्दृष्टयोऽसंख्येयगुणाः शेषाणां मिथ्यादृष्टिसा
सादनसम्यग्दृष्टिनाम्नां नास्ति अल्पबहुत्वं विपक्षे एकैकगुणस्थानग्रहणात् कोर्थः मिथ्यादृष्टिसासादनो न भवति
सासादनसम्यग्दृष्टिस्तं मिथ्यादृष्टिर्न वति यतः संज्ञानुवादेन संज्ञिनां चक्षुर्दर्शनिवत् चक्षुर्दर्शनिनां काययोगिवत्।
काययोगिनां सामान्यादित्यर्थः असंज्ञिनां नास्ति अल्पबहुत्वं येन संज्ञिनो नाप्यसंज्ञिनस्तेषां केवलज्ञानिवत् आहा
रानुवादेन आहारकाणां काययोगिवत् अनाहारकाणां सर्वतः स्तोकाः सयोगिकेवलिनः अयोगिकेवलिनश्च संख्ये
यगुणाः सासादनसम्यग्दृष्टयोऽसंख्येयगुणाः असंयतसम्यग्दृष्टयोऽसंख्येयगुणाः मिथ्यादृष्टयोऽनंतगुणाः एवं गु-
णानां गत्यादिषु मार्गणान्वेषणा कृता सामान्येन तत्र सूक्ष्माः भेदाः आगमाविरोधेनानुसर्तव्याः एवं सम्यग्दर्शनस्य प्र-
थमतः उद्दिष्टस्य तत्वार्थश्रद्धानं सम्यग्दर्शनस्य लक्षणोत्पत्तिस्वामिविषयन्यासाधिगमोपायो निर्दिष्टः तत्वार्थश्रद्धा
नं सम्यग्दर्शनमिति लक्षणं तन्निसर्गादधिगमाद्वा इत्यनेनोत्पत्तिः सम्यग्दर्शनस्वामिनो जीवा जीवादिपदार्थाः
सम्यग्दर्शनस्य विषयः नामस्थापनाद्रव्यभावतस्तन्न्यासः प्रमाणनयैरधिगमः निर्देशस्वामित्वसाधनाधिकरणस्थि-
तिविधानतः इत्यनेन सूत्रेनाधिगमस्योपायः तथा सत्संख्याक्षेत्रस्पर्शनकालांतरभावाल्पबहुत्वैश्चेति सम्यक्त्वस्याधि
गमोपायः तत्संबंधेन च सम्यग्दर्शनसंबंधेन जीवादीनां संज्ञा परिनामादि निर्दिष्टं जीवाजीवाश्रवबंधसंवरनिर्जरा
मोक्षास्तत्वमिति संज्ञा अस्यैव सूत्रस्य वृत्तौ जीवादीनां निरुक्तिद्वारेण परिनामानि वेदितव्यं अथ सम्यग्ज्ञानं-

३४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यगुणाः अयोगिकेवलिनस्तावंत एव उपशांतकषायेभ्यः संख्येयगुणा इत्यर्थः सयोगिकेवलिनः संख्येयगुणाः संयता
संयतानां नास्त्यल्पबहुत्वं असंयतेषु सर्वतः स्तोकाः सासादनसम्यग्दृष्टयः सम्यग्मिथ्यादृष्टयः संख्येयगुणाः असं
यतसम्यग्दृष्टयो ऽसंख्येयगुणाः देवापेक्षया इत्यर्थः मिथ्यादृष्टयो ऽनंतगुणाः दर्शनानुवादेन चक्षुर्दर्शनिनां का
ययोगिवत् सामान्यवदित्यर्थः अवधिदर्शनिनां अवधिज्ञानवत् केवलदर्शनिनां केवलज्ञानिवत् लेश्यानुवादेन कृ
ष्णनीलकापोतलेश्यानां असंयतवत् तेजःपद्मलेश्यानां सर्वतस्तोकाः अप्रमत्ताः प्रमत्ताः संख्येयगुणाः संयतासंयतसा
सादनसम्यग्दृष्ट्यसंयतसम्यग्दृष्टीनां पंचेंद्रियवत् शुक्ललेश्यानां सर्वतः स्तोकाः २२९९६ क्षपकाः संख्येयगुणाः २९९७०
सयोगिकेवलिनः संख्येयगुणाः ८९८५०२ अप्रमत्तसंयताः संख्येयगुणाः २९९९९१०३ प्रमत्तसंयताः संख्येयगुणाः ५९३९
८२०६ संयतासंयताः संख्येयगुणाः तिर्यग्मनुष्यापेक्षया सासादनसम्यग्दृष्टयो ऽसंख्येयगुणाः सम्यग्मिथ्यादृष्टयो
ऽसंख्येयगुणाः मिथ्यादृष्टयो ऽसंख्येयगुणाः असंयतसम्यग्दृष्टयो ऽसंख्येयगुणाः भव्यानुवादेन भव्यानां सामान्यवत्
अभव्यानामल्पबहुत्वं नास्ति सम्यक्त्वानुवादेन क्षायिकसम्यग्दृष्टिषु सर्वतः स्तोकाः चत्वार उपशामकाः इतरेषां
प्रमत्तांतानां सामान्यवत् ततः संयतासंयताः संख्येयगुणाः असंयतसम्यग्दृष्टयो ऽसंख्येयगुणाः क्षायोपशमिकस
म्यग्दृष्टिषु सर्वतः स्तोकाः अप्रमत्ताः प्रमत्ताः संख्येयगुणाः संयतासंयताः संख्येयगुणाः तिर्यगपेक्षया असंयतसम्यग्दृ
ष्टयो ऽसंख्येयगुणाः औपशमिकसम्यग्दृष्टीनां सर्वतः स्तोकाः चत्वार उपशामकाः अप्रमत्ताः संख्येयगुणाः प्रमत्ताः संख्ये

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२५ निभवंतीति वेदितव्यं एतेषां भेदा अग्रे वक्ष्यंते अथ प्रमाणनयैरधिगम इति सूत्रं यत्पूर्वमुक्तं तत्र प्रमाणं ज्ञानमिति केचन मन्यंते के
चित्तु सन्निकर्षः प्रमाणमिति मन्यंते सन्निकर्ष इति कोर्थः इंद्रियं विषयश्च तयोः संबंधः सन्निकर्षः तदुभयमपि निराकर्तुं अधिकृतानामेव
मत्यादीनां प्रमाणत्वसूचनार्थं सूत्रमिदं प्राहुः ॥ १० ॥ तत्प्रमाणे ॥ तत् मतिश्रुतावधिमनःपर्ययकेवललक्षणं पंचविधं ज्ञानं द्वे प्रमाणे भवतः
न सन्निकर्षः प्रमाणं नापीन्द्रियं प्रमाणमित्यर्थः यदि सन्निकर्षः प्रमाणं तर्हि सूक्ष्माणां व्यवहितानां विप्रकृष्टानां चार्थानां ग्रहणप्रसंगः
स्यात् तेन सूक्ष्मव्यवहितानां विप्रकृष्टानां चार्थानां ग्रहणप्रसंगः स्यात् तेन सूक्ष्मा व्यवहिता विप्रकृष्टाश्चार्थाः इंद्रियैः सन्निकृष्टुं
न सक्यंते तेन तु सर्वज्ञत्वस्याभावात् तत्कथं यतः इंद्रियैर्न सन्निकृष्यंते तत् न ज्ञायते तेन सर्वज्ञाभावो भवेत् इंद्रियमपि प्रमाणं न भवेत्
उक्तदोषत्वादित्यर्थः चक्षुरादीनां विषयो अल्पः ज्ञेयं तु अनंतत्वात् परिमाणं यतः सर्वेषामिंद्रियाणां सन्निकर्षाभावश्च वर्तते चक्षुरम
नसोरप्राप्यकारित्वात् न चक्षुरनिंद्रियाभ्यामिति वचनाच्च यदि ज्ञानं प्रमाणं तर्हि फलाभावः अधिगमो हि इष्टं फलं वर्त्तते न भावांतरं चे
दधिगमः प्रमाणं न तस्याधिगमस्य अन्यत्फलं भवितुमर्हति प्रमाणेन च फलवता भवितव्यं सन्निकर्षे इंद्रिये वा प्रमाणे सति अधिगमो
र्थांतरभूतः फलं युज्यते तदयुक्तं यदि सन्निकर्षः प्रमाणं अर्थाधिगमः फलं तस्य प्रमाणस्य द्विष्ठत्वात् तत्फलभूतेन अधिगमेनापि
द्विष्ठेन भवितव्यं कथं द्विष्ठोधिगमः अर्थाधीनो यतः आत्मनश्चेतनत्वात् तत्रैवात्मनि समवाय इति चेत् ज्ञस्वभावाभावे सर्वेषा
मर्थानामचेतनत्वात् ज्ञस्वभावाभ्युपगमे वा आत्मनो भवति तर्हि प्रतिज्ञाहानिस्तव भवति तेषामचेतनत्वात् ननु चोक्तं ज्ञाने २५
प्रमाणे सति फलाभाव इति यदार्हतैनोक्तं तन्नैष दोषः अर्थाधिगमे प्रीतिदर्शनात् ज्ञस्वभावस्य आत्मनः कर्ममलीमसस्य कर

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विचार्यते मतिश्रुतावधिमनःपर्ययकेवलानि ज्ञानम् इंद्रियैर्मनसा च यथायथमर्थान् मन्यते मतिः मनुते
ऽनया वा मतिः मननं वा मतिः श्रुतज्ञानावरणकर्मक्षयोपशमे सति निरूप्यमाणं श्रूयते यत्तत् श्रुतं शृणो
त्यनेन तदिति वा श्रुतं श्रवणं वा श्रुतं अवधानं अवधानं अवधिः कोर्थः अस्तादधस्तरविषयग्रहणादवधिरुच्यते देवाश्च अव लु
धिज्ञानेन सप्तमनरकपर्यंतं पश्यंति उपरिलोकं पश्यंति निजविमानध्वजदंडपर्यंतमित्यर्थः अवच्छिन्नविषयत्वादवधिः कोर्थः
निरूपितलक्षणविवच्छिन्नविषयत्वाद्वा अवधिः परकीयमनसि स्थितोर्थः साहचर्यान्मनस्तेन मनइत्युच्यते तस्य पर्ययणं परिगम
नं परिज्ञानं मनःपर्ययः ननु तन्मतिज्ञानमेव तन्न अपेक्षामात्रत्वात् क्षयोपशमशक्तिमात्रविजृंभितं तत्केवलं स्वपरमनोभि
र्व्यपदिश्यते यथाभ्रे चंद्रमसं पश्येति तथा मनसि मनःपर्ययः अर्थ्यं व्यापि मनोव्यापि यल्लिंगं वा येन अभ्यंतरेण च तपसा मुनयो
मार्गं सेवंते तत्केवलं असहायत्वाद्वा केवलं प्रांते लभ्यते यतः तदर्थं केवलस्य अंते गृहणं मनःपर्ययः सामीप्ये केवलज्ञानं प्राप्य
ते तेन मनःपर्ययस्य समीपे केवलस्य ग्रहणं अन्त्ययोः प्रत्यासत्तिः कस्मात् संयमैकाधिकरणत्वात् यथाख्यातचारित्रत्वादित्यर्थः
केवलज्ञानस्य अवधिः दूरतरवर्ती कृतः तत्किमर्थं दूरतरत्वात् अवधिमनःपर्ययःकेवलज्ञानत्रयात् परोक्षज्ञानं मतिश्रुत
द्वयं पूर्वं किमर्थमुक्तं तस्य द्वयस्य सुगम्यत्वात् मतिश्रुतानुपरिपाटीश्रुतपरिचितानुभूता वर्त्तते सर्वेण प्राणिगणेन तद्द्वयं प्रायेण प्रा
प्यते मतिश्रुतपद्धतेर्वचनेन श्रुतायां सकृत्स्वरूपं संवेदनमात्रं परिचितत्वमुच्यते अशेषविशेषतः पुनःपुनश्चेतसि तत्स्वरूपप
रिभावनमनुभूतत्वं कथ्यते मतिश्च श्रुतं चावधिश्च मनःपर्ययश्च केवलं च मतिश्रुतावधिमनःपर्ययकेवलानि एतानि पंच ज्ञाना

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२६ च्यते द्विवचननिर्देशसामर्थ्यात् गौणस्यापि श्रुतज्ञानस्य आद्यत्वेन ग्रहणं वेदितव्यं एतद् ज्ञानद्वयं परोक्षं प्रमाणं कस्माद् उ
च्यते इंद्रियाणीं द्रियाणि पराणि प्रकाशादिकं च आदिशब्दात् गुरूपदेशादिकं च परं मतिश्रुतज्ञानावरणक्षयोपशमश्च
परमुच्यते तत्परं बाह्यं निमित्तमपेक्ष्य अक्षस्यात्मनः उत्पद्यते यत् ज्ञानद्वयं तत्परोक्षमित्युच्यते तदिंद्रियानिंद्रियनिमित्तं श्रुत
मनिंद्रियस्येति वचनात् उपमानं आगमादिकं च प्रमाणं परोक्षं एव प्रमाणे अंतर्भूतं ज्ञातव्यमिति अथ किं प्रत्यक्षं प्रमाणमिति
प्रश्ने सूत्रमिदमुच्यते १२ प्रत्यक्षमन्यत् अश्नोति व्याप्नोति जानाति वेत्तीत्यक्षः आत्मानमक्षमात्मानं अवधिमनःपर्यया
पेक्षया परिप्राप्तक्षयोपशमं केवलापेक्षया प्रक्षीणावरणं वा प्रतिनियतं प्रतिनिश्चितं प्रत्यक्षं अन्यत् अवधिमनःपर्ययके
वलज्ञानत्रयं प्रत्यक्षं प्रमाणं भवति अत्राह कश्चित् अवधिदर्शनकेवलदर्शनमपि अक्षमेव आत्मानमेव प्रतिनियतं
वर्त्तते तेन कारणेन तदपि प्रत्यक्षं प्रकथ्यं सत्यं ज्ञानमित्यनुवर्त्तते कस्मिंश्चित्स्त्राद्ये ज्ञानमित्यनुवर्त्तते मतिश्रुतावधिम
नःपर्ययकेवलानि ज्ञानमित्यत्र सूत्रे ज्ञानस्य ग्रहणं वर्त्तते तेन कारणेन दर्शनस्य व्युदासः दर्शनं न प्रत्यक्षं प्रमाणमित्यर्थः
तस्मिन्नपि प्रमाणे सति विभंगज्ञानमपि अक्षमेव आत्मानमेव प्रतिनियतं तेन कारणेन विभंगज्ञानस्यापि प्रमाणत्वेन
ग्रहणं प्राप्नोति तदपि न प्रमाणं सम्यगित्यधिकारात् क्वासौ सम्यगधिकारो वर्त्तते सम्यग्दर्शन ज्ञानचारित्राणि मोक्ष
मार्ग इत्यत्र सूत्रे सम्यग् [illegible] शब्दस्य ग्रहणमस्ति तेन कारणेन विभंगज्ञानस्य प्रमाणत्वप्रतिषेधः तेनात्र सम्यक्श
ब्देन विशेषणभूतेन ज्ञानं विशिष्यते तेन कारणेन विभंगज्ञानस्य निषेधः कृतो भवति न प्रमाणमित्यर्थः विभंग २६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

णालंबनात् अर्थाविनिश्चये सति प्रत्युपजायते सोपि प्रीतिः फलमुच्यते अथवा उपेक्षा अज्ञाननाशो वा फलं का उपेक्षा रागद्वेषयोरप्रणि-
धानमुपेक्षा अंधकारसदृशाज्ञानाभावः अज्ञाननाशो वा फलमित्युच्यते प्रमिणोतीति प्रमाणं कर्त्तर्युटो अन्यत्रापि चेति कर्त्तर्यु-
ट् प्रमीयतेऽनेनेति प्रमाणं करणाधिकरणयोश्चेति करणे युट् प्रमितिः प्रमाणं भावे युट् इति सूत्रत्रयेण व्युत्पन्नेः परवाद्याह किमनेन प्रमीय-
ते जैनः प्राह जीवाद्यर्थः यदि जीवादेरधिगमे प्रमाणं वर्त्तते तर्हि प्रमाणाधिगमे अन्यत्प्रमाणं परिकल्पनीयं तथा सति अनवस्था भवति
जैनः प्राह न अनवस्था वर्त्तते किंवत् प्रदीपवत् यथा घटपटलकुटस्तंभादीनां प्रकाशने प्रदीपो हेतुर्भवति तथा स्वस्वरूपप्रकाशने
पि स एव प्रदीपः हेतुर्भवति न प्रदीपस्य प्रकाशने प्रकाशांतरं विलोक्यते एवं प्रमाणमपि स्वपरप्रकाशकमित्यवगंतव्यं अवश्य-
मेव चैतदंगीकर्त्तव्यं किंवत् प्रमेयवत् यथा प्रमेयं वर्त्तते तथा प्रमाणमस्ति यदि प्रमाणस्य [illegible] प्रमाणांतरं परिकल्प्यते त-
र्हि स्वाधिगमस्याभावो भवति प्रमाणं निजस्वरूपं न जानाति तथा सति स्मृतेरभावः स्यात् स्मृतेरभावात् व्यवहारविच्छेदो भवेत्
आद्ये परोक्षं प्रत्यक्षमन्यदिति वक्ष्यमाणभेदापेक्षया द्विवचननिर्देशो वेदितव्यः स च द्विवचननिर्देशः अपरप्रमाणसंख्यावि-
च्छेदार्थः प्रत्यक्षं चानुमानं च सार्द्धं चोपमया सह अर्थापत्तिपरिभावश्च षट्प्रमाणानि जैमिनेः इति श्लोकोपमानार्थापत्तिप्रभ-
तीनां प्रत्यक्षपरोक्षयोः प्रमाणद्वयेंतर्भावात् अभवर्गोक्तं पंचविधाज्ञानस्य प्रमाणद्वयांतःपतितस्य अनुमानादिप्रमाणकल्प-
नानिरासार्थं प्रमाणयोर्भेदमाह १० आद्ये परोक्षं आदौ भवं आद्यं च आद्यं च आद्ये मतिज्ञानश्रुतज्ञाने द्वे परोक्षं प्रमाणं भवति
आद्ये इत्युक्ते प्रथमे मतिश्रुतयो द्वयमलंकयं सत्ये प्रथमं मतिज्ञानं तन्मुख्यं तस्यासन्नापवर्त्तित्वात् उपचारेण श्रुतमपि प्रथममु-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

३७ गंनातिक्रामति मतिस्मृतिसंज्ञाचिंताभिनिबोधास्ते: योर्थोभिधीयते स एक एवेत्यर्थः तथापि भेद उच्यते बहिरंगमंतरंगंचा
र्थंपरिस्फुरंतं यथा आत्मा मन्यते सा अवग्रहेहावायधारणालक्षणा मतिरुच्यते स्वसंवेदनमिंद्रियज्ञानंच सांव्यवहारिकं प्रत्य
क्षंतदिति अतीतार्थग्राहिणी प्रतीतिः स्मृतिरुच्यते तदेवेदं तत्सदृशं चेति प्रत्यभिज्ञानं संज्ञा कथ्यते यथाग्निं विना धूमो न स्या
त्तथा आत्मानं विना शरीरव्यापारवचनादिकं न स्यादिति वितर्कणं ऊहनं चिंताभिधीयते धूमादिदर्शनादग्न्यादिप्रतीतिरनु
मानं अभिनिबोधः अभिधीयते इतिशब्दात्प्रतिभाबुद्धिमेधाप्रभृतयो मतिज्ञानप्रकारा वेदितव्याः रात्रौ दिवा वा अकस्माद्वाह्य
प्रालसमये ६ कारणं विना श्वो मे इष्टः समेष्यतीत्येवंरूपं यद्विज्ञानमुत्पद्यते सा प्रतिभाभिधीयते अर्थग्रहणशक्तिर्बुद्धिरुच्यते पाठग्रहण
शक्तिर्मेधाभिधीयते उक्तंच मतिरागमिकाज्ञेया बुद्धिस्तत्कालदर्शिनी प्रज्ञातीतकालज्ञा मेधाकालत्रयात्मिका १ अ
थ मतिज्ञानस्य आत्मलाभे किंनिमित्तमिति प्रश्ने सूत्रं सूचयंति तदिंद्रियानिंद्रियनिमित्तं तन्मतिज्ञानं इंद्रियानिंद्रियनिमि
त्तं इंदति परमैश्वर्यं प्राप्नोतीतींद्रः आत्मा तस्य आत्मनः ज्ञायकैकस्वभावस्य मतिज्ञानावरणक्षयोपशमे सति स्वयमर्थान्
ग्रहीतुं असमर्थस्य यदर्थोपलब्धिलिंगं तत् इंद्रस्य लिंगं इंद्रियमुच्यते अथवा लीनमर्थं गमयति ज्ञापयतीति लिंगमिंद्रियमुच्यते आ
त्मनः सूक्ष्मस्य अस्तित्वाधिगमकारकं लिंगमिंद्रियमित्यर्थः अग्नेर्धूमवत् इत्यमिदं स्पर्शनादिकरणं आत्मनो लिंगं वे
दितव्यं आत्मानं विना लिंगमिंद्रियं न भवतीति ज्ञातुः कर्तुरात्मनोऽस्तित्वमिंद्रियैर्गम्यते अथवा नामकर्मणः इंद्र इति संज्ञा इंद्रे ३७
ण नामकर्मणा सृष्टं इंद्रियमुच्यते तत् इंद्रियं स्पर्शनादिकं तदिंद्रियं पंचप्रकारं स्पर्शनरसनघ्राणचक्षुःश्रोत्राणीति वचनात्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ज्ञानं हि मिथ्यादर्शनोदयाद्विपरीतार्थगोचरं तेन कारणेन तत् सम्यग्विशेषेण विशिष्टं अथ कथं मन्यसे इंद्रिय
व्यापारजनितं ज्ञानं खलु प्रत्यक्षं व्यतीतेंद्रियव्यापारं ज्ञानं परोक्षमेतत् एतत्प्रत्यक्षपरोक्षयोर्लक्षणं अक्षुण्णं वेदितव्यमिति तन्न
संगच्छते तथा सति सर्वज्ञस्य प्रत्यक्षज्ञान [illegible] भावो भवति यदि इंद्रियनिमित्तमेव ज्ञानं प्रत्यक्षं त्वया मन्यते तथा स
र्वज्ञस्य प्रत्यक्षज्ञानमेव न स्यात न हि सर्वज्ञस्य इंद्रियपूर्वो अर्थाधिगमो भवति अथ सर्वज्ञस्य करणपूर्वकमेव ज्ञानं त्वया क
ल्प्यते तर्हि सर्वज्ञस्य असर्वज्ञत्वं भवेत् अथ सर्वज्ञस्य मानसं ज्ञानं प्रत्यक्षमिति त्वं मन्यसे मनःप्रणिधानपूर्वकत्वात् तर्हि ज्ञानस्य
सर्वज्ञत्वाभावो भवति आगमात् सर्वज्ञस्य सिद्धिरिति चेत् तदपि न आगमस्य प्रत्यक्षज्ञानपूर्वकत्वात् योगिप्रत्यक्षं अपरमेव दिव्य
ज्ञानमस्ति इति चेत् त्वं मन्यसे तदपि न घटते योगिनः प्रत्यक्षं इंद्रियनिमित्ताभावाद्भवति अक्षं अक्षं प्रति यद्वर्तते तत्प्रत्यक्षं इत्य
भ्युपगमात् किं च सर्वज्ञत्वाभावः प्रतिज्ञाहानिर्वा तव भवति अलमतिप्रसंगेन अथेदानीं परोक्षज्ञानस्य विशेषपरिज्ञाना
र्थं सूत्रमिदं प्राहुः १३ मतिः स्मृतिः संज्ञा चिंताभिनिबोध इत्यनर्थांतरं मननं मतिः स्मरणं स्मृतिः संज्ञानं संज्ञा चिंतनं चिं
ता अभिनिबोधनं अभिनिबोधः इति एवंप्रकारा मतिज्ञानस्य पर्यायशब्दाः वेदितव्या एते शब्दाः प्रकृत्या भेदेपि सति रूढिवशा
त् न अर्थांतरं मतिज्ञानार्थ एव त्वर्थः यथा इंदतीति इंद्रः शक्नोतीति शक्रः पुरं दारयतीति पुरंदरः इत्यादि इंदनादिक्रियाभेदेपि
शचीपतिरेवोच्यते तथा समभिरूढनयापेक्षया अर्थांतरे सत्यपि मतिज्ञानमेवोच्यते मतिज्ञानावरणक्षयोपशमे अंतरंगनिमि
त्ते सति जनितोपयोगविषयत्वात् एतेषां मतिज्ञानभेदेन श्रुतादिषु अप्रवृत्तिर्वर्त्तते मतिज्ञानावरणक्षयोपशमनिमित्तोपयो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

३८ सन्निपातमात्रदर्शनं अवग्रहस्तुमतिज्ञानस्यभेदः सन्निपातलक्षणदर्शनानंतरंआद्यंग्रहणं अवग्रहउच्यते यथाचक्षुषाशु
क्लंरूपमितिग्रहणमितिअवग्रहः अवग्रहेणगृहीतोयोर्थःतस्यविशेषपरिज्ञानाकांक्षणमीहाकथ्यते यथाचक्षुषाय
शुक्लंरूपंमयागृहीतंतदनंतरंएषाउत्पततिनिपततिपक्षविशेषादिकंकरोति तेनज्ञायतेइयंबलाकेभवति पताकानभव
ति एवंयाथात्म्यावगमनंवस्तुस्वरूपनिर्द्धारणंअवायउच्यते अवेतस्यसम्यग्परिज्ञातस्यकालांतरेअविस्मरणकार
णंज्ञानंसाधारणेत्युच्यते यथायाबलाकापूर्वाह्णेमयादृष्टासैवेयंबलाकावर्त्तते एवंविधंधारणालक्षणं अवग्रहेहावाय
धारणानामुपन्यासक्रमोविहितःकोर्थः उत्पत्तिक्रमइत्यर्थः अथावग्रहादीनांचतुर्णांमतिज्ञानभेदानांप्रभेदपरिज्ञानार्थंसू
त्रमिदमाहुः १६ बहुबहुविधक्षिप्रानिःसृतानुक्तध्रुवाणांसेतराणां अवग्रहेहावायधारणाःक्रियाविशेषाःक्रियाभे
दाःप्रक्रांताःप्रक्रांताः तदपेक्षोयंकर्मनिर्देशोविषयनिर्देशः अवग्रहादयःबह्वादीनांसेतराणांविषयेभवंतीत्यर्थः
बहुशब्दोत्रसंख्यावाचीवैपुल्यवाचीचवेदितव्यः संख्यावाचीयथा एकःद्वौबहवः वैपुल्यवाची यथाबहुकूरःबहुसू
पः बहुविधःबहुप्रकारः क्षिप्रंचअचिरंअनिःसृतं असकलपुद्गलः अनुक्तंचअभिप्रायेस्थितं ध्रुवंचनिरंत
रं यथार्थग्रहणं बहुबहुविधक्षिप्रानिःसृतानुक्तध्रुवाणि तेषांबहुबहुविधक्षिप्रानिःसृतानुक्तध्रुवानां कथंभूतानांसे
तराणांप्रतिपक्षसहितानांतेनायमर्थः बहूनामवग्रहः तदितरस्यअल्पस्यावग्रहः बहुविधस्यावग्रहः तत्प्रतिपक्ष ३८
भूतस्यएकविधस्यावग्रहः क्षिप्रेणावग्रहः तदितरेणचिरेणावग्रहः अनिःसृतस्यावग्रहः तदितरस्यनिःसृतस्यावग्रहः

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सूत्रेण व्यस्यते तदिंद्रियं मनः अंतःकरणमिति पर्यायशब्दाः ननु नइंद्रियं अनिंद्रियमिति इंद्रियप्रतिषेधेन मनसि इंद्रलिंगे सत्यपि अ
निंद्रियशब्दस्य प्रवृत्तिः कथं सत्यं नञ्शब्दः ईषदर्थे वर्त्तते नइंद्रियकोऽर्थः ईषत् नइंद्रियमनिंद्रियं ईषदिंद्रियमित्यर्थः यथा अनु
दरा कन्या यदि कन्या सर्वथा उदररहिता भवति तदा सा कथं जीवति तेन ज्ञायते अनुदरा ईषदुदरा कन्येति ननु मनः ईषदिंद्रि
यं कथं सत्यं यथा इंद्रियाणि प्रतिनियतदेश विषयाणि कालांतरस्थायीनि च वर्त्तंते मनस्तादृशं न कथ्यते अंतःकरणं च कथमुच्य
ते गुणदोषविचारस्मरणादिव्यापारेषु मनः इंद्रियानि नापेक्षते यतः चक्षुरादिवत् बाह्यैः पुरुषैः यतो नाद्युपलभ्यते
तेनांतर्गतं करणमंतःकरणमित्युच्यते इंद्रियाणि अनिंद्रियं च इंद्रियाणि तानि निमित्तानि यस्य मतिज्ञानस्य तत् इंद्रियानिंद्रि
यनिमित्तं ननु अनंतरस्य विधिः प्रतिषेधो वेति परिभाषासूत्रबलात् इंद्रियानिंद्रियनिमित्तमिति सूत्रेणैव मतिज्ञानं लभ्यते कि
मर्थं तद्ग्रहणं तद्ग्रहणार्थं उत्तरसूत्रार्थं च गृह्यते यन्मतिः स्मृतिः संज्ञा चिंताभिनिबोध बुद्धि प्रज्ञा मेधादिपर्यायशब्दा
वाच्यं ज्ञानं तत् इंद्रियानिंद्रियनिमित्तं तदेवं अवग्रहेहावायधारणा अपि मतिज्ञानं भवति अन्यथा प्रथमं ज्ञानं मतिस्मृ
त्यादिशब्दवाच्यं इंद्रियानिंद्रियनिमित्तं अवग्रहेहावायधारणा अपि श्रुतमित्यनिष्टोऽर्थ उत्पद्यते ततः कारणात् अवग्रहा
दि इंद्रियानिंद्रियनिमित्तं वेदितव्यं अथ मतिज्ञानस्य उत्पत्तिनिमित्तं ज्ञातं मतिज्ञानस्य भेदपरिज्ञापनार्थं सूत्रमिदं प्राहुः १४
अवग्रहेहावायधारणाः अवग्रहणमवग्रहः ईहनमीहा अवायनं अवायः धारणं धारणा अवग्रहश्च ईहा च अवायश्च धा
रणा च अवग्रहेहावायधारणाः एते चत्वारो भेदा मतिज्ञानस्य भवंति अवग्रहादीनां स्वरूपं निरूप्यते अवग्रहस्य प्राग्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

३९ कदाचिदेकविधस्यावग्रहोभवति एवंन्यूनाधिकोऽवग्रहो ध्रुवउच्यते धारणातुअवग्रहीतार्थानाम विस्मरणकारणं
इतिध्रुवावग्रहधारणयोर्महान्भेदोवर्त्तते अथयद्यवग्रहादयोवक्रादीनांविषयानांस्वीकर्त्तारोभवंति तर्हिवक्रादीनि
विशेषणानिकस्यभवंतीतिप्रश्नेउत्तरमाह १६ अर्थस्य स्थिरःस्थूलरूपश्चक्षुरादीन्द्रियाणांग्राह्योविषयोगोचरोग
म्यइतियावत् वस्तुरूपोर्थउच्यते द्रव्यंवाअर्थउच्यते तस्यार्थस्यवक्रादिविशेषणविशिष्टस्यअवग्रहेहावायधारणाभ
वंतीतिसंबंधः किमर्थमि दंसूत्रमुच्यते यतःवक्रादिरर्थएवास्तिसत्यं मिथ्यावादिकल्पितानिषेधार्थंसूत्रमिदमुच्यते
केचिन्मिथ्यावादिनएवंमन्यते एवंकिंयत् रूपरसगंधवर्णशब्दाः पंचगुणाइंद्रियैःकिलसंकृष्यंते तेषांगुणानामवग्र
हइति तन्नसंगच्छते रूपादयोगुणाअमूर्त्ताः तेइंद्रियसंनिकर्षंनप्राप्नुवंति यदिनप्राप्नुवंतितर्हिमयारूपंदृष्टं गंधो
मयाआघ्रातः इतिनघटते इयर्त्तिपर्यायानर्थः अर्यतेवापर्यायैःयःसोर्थःद्रव्यंतस्मिन्द्रव्येइंद्रियैःसंनिकृष्य
माणेतस्माद्द्रव्यात्रूपादीनामव्यतिरेकेअपृथक्त्वेरूपादिष्वपिसंव्यवहारोयुज्यते नचतथासतिसंनिकर्षः अथअव्य
क्तवस्तुनःअवग्रहएवस्यात् नचईहादय इत्यर्थप्रतिपादनार्थंसूत्रमिदमाहुः १७ व्यंजनस्यावग्रहः व्यंजनस्यअव्यक्तशब्दा
समूहस्यअवग्रहएवभवति सवक्रादिरूपो द्वादशविधः चक्षुर्मनोवर्जितान्यचतुर्भिःइंद्रियैःप्रादुर्भावितअष्टचत्वा
रिंशत्प्रकारोभवति पूर्वोक्ताष्टाशीत्यधिकद्विशतमेलिता षट्त्रिंशदधिकत्रिशतप्रकारोमतिज्ञानभेदसमूहोभवति ३९
किमर्थमिदंसूत्रं नियमार्थमिदंसूत्रं व्यंजनस्यअवग्रहएवनईहादयः यथानूतनसरावः द्विजलकणैःसिक्तःसन्नार्द्रीभव

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनुक्तस्यावग्रहः तदितरस्य उक्तस्यावग्रहः ध्रुवस्यावग्रहः तदितरस्य अध्रुवस्यावग्रहः द्वादशप्रकारः तथा ईहापि द्वा
दशप्रकाराः तथा अवायोपि द्वादशप्रकारः तथा धारणापि द्वादशप्रकाराः एवं द्वादशचतुष्कैः अष्टचत्वारिंशद्भेदाः भवं
ति सा अष्टचत्वारिंशत् षड्भिरिंद्रियैर्गुणिता अष्टाशीत्यधिका द्विशती भवति तत्र बह्वाद्यवग्रहादयः षट्प्रकाराः षण्णां प्रभेदा ज्ञ
ज्ञानावरणक्षयोपशमप्रकर्षाद्भवंति अल्पैकविधक्षिप्रानिसृतोक्ताध्रुवाः षट् इतरे प्रकाराः ज्ञानावरणक्षयोपशमस्य अप्रक
र्षात् क्षयोपशममात्राद्भवंति अत एव कारणात् बह्वादीनामर्चितत्वात् आदौ ग्रहणं यथार्चितं द्व्योरिति वचनात् ननु बहुषु
बहुत्वं वर्तते बहुविधेष्वपि बहुत्वमस्ति कस्तयोर्विशेषः एकप्रकारनानाप्रकारविहितोस्ति भेदः ननु सकलपुद्गलनिःस
रणान्निसृतं उक्तं चाप्येवंविधमेव अनयोरपि निःसृतयोः कः प्रति विशेषो वर्तते सत्यं अन्योपदेशपूर्वकं यद्ग्रहणं तदुक्तमुच्य
ते स्वयमेव परोपदेशमंतरेणैव कश्चित्प्रतिपद्यते तद्ग्रहणं निसृतमुच्यते स्वयमेव परोपदेशमंतरेणैव कश्चित्प्रतिपद्यते त
द्ग्रहणं निसृतमुच्यते केचित् क्षिप्रं निसृतमिति पठंति ते एवं व्याख्यांति श्रोत्रेंद्रियेण सब्दमवगृह्य मयूरस्य कुररस्य वेति कश्चि
त्प्रतिपद्यते अपरस्तु स्वरूपमेव प्रतिपद्यते मयूरस्यैवायं शब्द इति निश्चारयति स निसृत उच्यते ननु ध्रुवावग्रहस्य धारणायाश्च को
विशेषः कर्मणः क्षयोपशमलब्धिकाले निर्मलपरिणामसंतानेन यः क्षयोपशमः प्राप्तः तेन प्रथमसमये यादृशो अवग्रहः संयातः
तादृश एव द्वितीयादिषु अपि समयेषु अवग्रहो भवति तस्माद् अवग्रहान्न्यूनाधिको न भवति स ध्रुवावग्रह कथ्यते यदा का
ले तु विशुद्धसंक्लिष्टपरिणामानां मिश्रणं भवति तस्मिन् काले यः कर्मणः क्षयोपशमो लब्धः तस्मात्क्षयोपशमात् संजायमानो वग्रहः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

४० इत्यायातं इंद्रियानामनिंद्रियस्य अर्थावग्रहसिद्धः अथ लक्षणतो भेदतश्च मतिज्ञानं ज्ञातं श्रुतज्ञानस्य लक्षणं भेदप्रभेदा
अनवबुध्यमाना इति प्रश्ने सूत्रमिदमूचुः २० श्रुतं मतिपूर्वं द्व्यनेकद्वादशभेदं श्रवणं श्रुतं ज्ञानविशेष इत्यर्थः ननु श्रवणमात्रं
यथा कुशं लुनातीति कुशलं रूढिवशात् सर्वत्र वर्तनं दक्ष इत्यर्थः ननु कुशलस्य लवनं तथा श्रवणं श्रुतमित्युक्ते श्रवणमात्रं न भव
ति किंतु ज्ञानविशेषः कोसौ ज्ञानविशेषः मतिपूर्वं मतिपूर्वं निमित्तं कारणं यस्य तन्मतिपूर्वं पूरयति प्रमाणत्वमिति पूर्वमि
त्युत्पत्तेः अथवा मतिः पूर्वोक्तलक्षणा पूर्वं यस्य तन्मतिपूर्वं मतिकारणमित्यर्थः ननु कारणसदृशं कार्यं भवतीति कारण
त् श्रुतमपि मतिरेव तदेकांतिकं न भवति चक्रचीवरदवरदंडादिकारणो घटः न च चक्रचीवरदवरदंडात्मको भवति चक्रादौ सत्य
पि घटाभावात् सत्यपि मतिज्ञाने चक्षुरादिके वलवश्रुतावरणकर्मोदययुतस्य जीवस्य श्रुतज्ञानाभावात् श्रुतज्ञानावरणक्षयो
पशमप्रकर्षे सति तु ज्ञानमुत्पद्यते तेन कारणेन मतिज्ञानं श्रुतज्ञानस्य निमित्तमात्रं वर्तते ननु श्रुतज्ञानं मत्यात्मकं वर्तते इति वे
दितव्यं अत्राह कश्चित् श्रुतज्ञानं किलादिनिधनं भवद्भिरुच्यते ननु मतिपूर्वं मतिपूर्वकत्वे श्रुतस्य श्रुताभावात् प्राप्नोति यदा
दिमत्त्वं तत्त्वत् तेन कारणेन पुरुषप्रणीतत्वात् श्रुतज्ञानस्य न प्रमाणं सत्यं द्रव्यक्षेत्रकालादौ समर्पणेन श्रुतज्ञानमनादिनिधनं
वर्तते चतुर्थकालादौ पूर्वविदेहादौ कल्पादिषु च श्रुतस्य सर्वसामान्यापेक्षणात् न हि केनचित्पुरुषेण क्वचित्क्षेत्रे कदाचित्काले
केनचि[illegible] प्रकारेण श्रुतं ज्ञानं कृतं वर्तते द्रव्यादीनामेव विशेषापेक्षया श्रुतज्ञानस्य ४०
आदिरंतश्च घटते यतो वृषभसेनादयो द्वयभूताः तैः श्रुतज्ञानस्य आदिः कृतः वीरांगजांत [illegible] विशेषापेक्षया श्रुतस्यांतः संग

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वि सखसरावः पुनः पुनः सिच्यमानः सनैः सनैः सार्द्रीभवति क्लिद्यति तथा श्रोत्रादिभिरिंद्रियैः शब्दादिपरिणताः पुद्गलाः द्व्यादिषु क्षणेषु गृह्यमानाः व्यक्ता भवंति पुनःपुनरवग्रहे सति तु व्यक्ता भवंति अतः कारणात् यावद्व्यक्तोऽवग्रहो न भवति तावद्व्यंजनावग्रह एव उत्तरकाले तु व्यक्तस्य अवग्रहेहावायधारणा अपि भवंति तर्हि सूत्रे एवकारो ग्रहीतव्यः कथं व्यंजनस्यावग्रह एव इति सूत्रं विधीयतां सत्यं सिद्धे विधेरारभ्यमानो नियमार्थ एव सिद्धे सत्यारंभो नियमाय इति वचनात् अथ सर्वेंद्रियेषु व्यंजनावग्रहे प्राप्ते इंद्रियद्वय निषेधार्थं सूत्रमिदमुच्यते १८ नचक्षुरनिंद्रियाभ्यां चक्षुश्च अनिंद्रियं च चक्षुरनिंद्रिये ताभ्यां चक्षुरनिंद्रियाभ्यां चक्षुषा अनिंद्रियेण च मनसा व्यंजनावग्रहो न भवति यतः कारणात् अप्राप्तमर्थं अविदिक्कं युक्तं संनिकर्षविषये अवस्थितं बाह्यप्रकाशाभिः व्यक्तं चक्षुरुपलभते मनश्च अप्राप्तमुपलभते इति कारणात् चक्षुर्मनसो व्यंजनावग्रहो न भवति चक्षुषः अप्राप्यकारित्वं कथमवसीयते आगमाद्युक्तितश्च कोऽसावागमः पुट्ठं सुणेदि सद्दं अपुट्ठं पुण विपस्सदे रूवं गंधं रसं च फासं च बद्धपुट्ठं वियाणादि का सौ युक्तिः चक्षुरप्राप्यकारि कुतः स्पृष्टानग्रहात् यत चक्षुषा स्पृष्टं तन्न अवगृह्णातीत्यर्थः यदि चक्षुः प्राप्यकारि स्यात् तर्हि स्पृष्टमंजनं त्वगिंद्रियवत् तदवगृह्णीयात् न चावगृह्णाति चक्षुः स्पृष्टं वस्तु नेक्षते इत्यर्थः ततः कारणात् मनोवत् चक्षुरप्राप्यकारीवेदितव्यं [illegible]

[illegible] तेन कारणेन चक्षुर्मनसी द्वे वर्जयित्वा स्पर्शनघ्राणश्रोत्रेंद्रियाणां चतुर्णामपि व्यंजनावग्रहो भवत्येव तत्

लो॰ ९८१

सन्मुखागतं

स्पर्शि... ला

तिरा ...

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0 In Public Domain. Digitized by Sarayu Trust/eGangotri

सुंभतरामपांडे

सिताबमहता वरायजी मेरुपैया रु ५ दुसमी यांसं आयार

पुरवी सोजन्मा कीया मीती चैत्रवद [illegible] समाचार

[illegible]

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0 In Public Domain. Digitized by Sarayu Trust eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi